१२८. तन्नोपपद्यते पूर्वोत्तरविरोधात् । (१५)

१२९. अथ हैकेषां ब्राह्मणं भवति श्येन चिदग्नीनां पूर्वाततिरिति ।

१३०. अथापरेषाम् ।

१३१. न ज्यायाꣳसं चित्वा कनीयाꣳसं चिन्वीतेति ।

१३२. अथास्माकम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१३३. पक्षी भवति । न ह्यपक्षः पतितुमर्हति । अरत्निना पक्षौ द्राघीयाᳩंसौ भवतः। तस्मात्पक्षप्रवयाᳩंसि वयाᳩंसि। व्याममात्रौ पक्षौ च पुच्छं च भवतीति । (२०)

१३४. नापक्षपुच्छः श्येनो विद्यते। न चासप्तविधस्य पक्षपुच्छानि विद्यन्ते न च सप्तविधं चित्वैकविधप्रसङ्गः । तस्मात्सप्तविध एव प्रथमोऽग्निः ।

१३५. भेदान्वर्जयेत् ।

१३६. अधरोत्तरयोः पार्श्वसंधानं भेदा इत्युपदिशन्ति ।

१३७. तदग्न्यन्तेषु न विद्यन्ते ।

१३८. न स्रक्तिपार्श्वयोः । (२५)

१३९. साहस्रं चिन्वीत प्रथमं चिन्वान इति ।

१४०. पञ्चमायां वा चितौ संख्यां पूरयेत् ।

१४१. द्विशताश्चेच्चिकीर्षेत्पञ्चचोडाभिर्नाकसदः समानसंख्यं प्रतीयात् । (२८)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षष्ठः खण्डः

१४२. पशुधर्मो ह वा अग्निः। यथा ह वै पशोर्दक्षिणेषामस्थ्नां यद् दक्षिणं पार्श्वं तदुत्तरेषामुत्तरं यदुत्तरेषां दक्षिणं तद्दक्षिणेषामुत्तरं यदवाक् चोर्ध्वं च तत्समानमेवमिष्टकानाᳬरूपाण्युपदध्यात् १

१४३. या दक्षिणावृतो लेखास्ता दक्षिणत उपदध्यात्।

१४४. सव्यावृत उत्तरतः।

१४५. ऋजुलेखाः पश्चाच्च पुरस्ताच्च भवन्ति।

१४६. त्र्यालिखिता मध्ये। (५)

१४७. अथ या विशयस्था यथा ह वै पशोः पृष्ठवᳬशो नैवैकस्मिन्पार्श्वे व्यतिरेकेण वर्तते नैवापरस्मिन्नेवं तासामुपधानं प्रतीयात्।

१४८. अथापि ब्राह्मणं भवति।

१४९. प्रजापतिर्वा अथर्वाग्निरेव दध्यङ् आथर्वणस्तस्येष्टका अस्थानीति।

१५०. तस्माद् बहिस्तन्वं चेच्चिनुयात्तन्वोपप्लवमध्यैरात्मोपप्लवमध्यान्त्संदध्यात्।

१५१. प्राञ्चमेनं चिनुत इति विज्ञायते। (१०)

१५२. अमृन्मयीभिरनिष्टकाभिर्न संख्यां पूरयेत्।

१५३. इष्टकचिद्वा अन्योऽग्निः पशुचिदन्य इत्येतस्माद् ब्राह्मणात्।

१५४. पशुर्वा एष यदग्निर्योनिः खलु वा एषा पशोर्विक्रियते यत्प्राचीनमैष्टकाद्यजुः क्रियत इति च।

१५५. लोकबाधीनि द्रव्याण्यवटेषूपदध्यात्।

१५६. मण्डलमृषभं विकर्णीमतीष्टकासु लक्ष्माणि प्रतीयात्। (१५)

१५७. इष्टकामन्त्रयोरिष्टकाव्यतिरेके लोकंपृणाः संपद्यन्ते परिमाणाभावात्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१५८. अतीतानेवेष्टकागणानत्रोपदध्यात् ।

१५९. पञ्च लोकंपृणाः ।

१६०. मन्त्रव्यतिरेकेऽक्ताः शर्कराः संधिषूपदध्यात् ।

१६१. प्राचीरुपदधाति प्रतीचीरुपदधातीति गणेषु रीतिवादः । (२०)

१६२. प्राचीमुपदधाति प्रतीचीमुपदधातीति कर्तुर्मुखवादः ।

१६३. पुरस्तादन्याः प्रतीचीरुपदधाति पश्चादन्याः प्राचीरित्यपवर्गः ।

१६४. चतुरस्रास्वेवैतदुपपद्यते । (२३)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सप्तमः खण्डः

१६५. न खण्डामुपदध्यात् । (१)

१६६. न भिन्नामुपदध्यात् ।

१६७. न कृष्णामुपदध्यात् ।

१६८. न जीर्णामुपदध्यात् ।

१६९. न लक्ष्माणमुपदध्यात् । (५)

१७०. न स्वयमातृण्णाꣳस्वयंचितावुपदध्यात् ।

१७१. ऊर्ध्वप्रमाणमिष्टकानां जानोः पञ्चमेन कारयेत् ।

१७२. अर्धेन नाकसदां पञ्चचोडानां च ।

१७३. यच्छोषपाकाभ्यां प्रतिह्लसेत पुरीषेण तत्संपूरयेत् पुरीषस्यानियतपरिमाणत्वात् ।

१७४. व्यायाममात्री भवतीति गार्हपत्यचितेर्विज्ञायते । (१०)

१७५. चतुरस्रेत्येकेषाम् ।

१७६. परिमण्डलेत्येकेषाम् ।

१७७. चतुरस्रꣳसप्तधा विभज्य तिरश्चीं त्रेधा विभजेत् ।

१७८. अपरस्मिन्प्रस्तार उदीचीरुपदधाति ।

१७९. समचतुरस्राश्चेदुपदध्यात् । (१५)

१८०. व्यायामषष्ठेनेष्टकाः कारयेच्चतुर्थेन तृतीयेनेति ।

१८१. तासां नव प्रथमा द्वादश द्वितीया इति पूर्वस्मिन्प्रस्तार उपदधाति ।

१८२. पञ्च तृतीयाः षोडश प्रथमा इत्यपरस्मिन् ।

१८३. परिमण्डलायां यावत्संभवेत्तावत्समचतुरस्रं कृत्वा तन्नवधा विभजेत् ।

१८४. प्रधीꣳस्त्रिधा त्रिर्धेति । (२०)

१८५. अपरं प्रस्तारं तथोपदध्याद्यथा प्रध्यनीकेषु स्रक्तयो भवन्ति ।

१८६. धिष्ण्या एकचितीकाश्चतुरस्राः परिमण्डला वा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१८७. तेषामाग्नीध्रीयं नवधा विभज्यैकस्याः स्थाने ऽश्मानमुपदध्यात् ।

१८८. अथ होतुर्धिष्ण्यं नवधा विभज्य पूर्वांꣳस्त्रिभागानेकैकं द्वेधा विभजेत् ।

१८९. अथेतरान्नवधा नवधा विभज्य मध्यम पूर्वौ द्वौ भागौ समस्येत् । (२५)

१९०. अथ मार्जालीयं त्रेधा विभज्य पूर्वापरौ भागौ पञ्चधा विभजेत् ।

१९१. उख्यभस्मना सꣳसृज्येष्टकाः कारयेदिति ।

१९२. संवत्सरभृत एवैतदुपपद्यते न रात्रिभृतः ।

१९३. एवमस्य मन्त्रवती चितिक्लृप्तिः ।

१९४. छन्दश्चितं त्रिषाहस्त्रस्य परस्ताच्चिन्वीत । (३०)

१९५. काम विवेकात् ।

१९६. तस्य रूपꣳश्येनाकृतिर्भवतीति । (३२)

इति द्वितीयोऽध्यायः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृतीयोऽध्यायः

अष्टमः खण्डः

१९७. अथ वै भवति श्येनचितं चिन्वीत सुवर्गकाम इति । (१)

१९८. आकृतिर्द्वैविध्यम् ।

१९९. चतुरस्रात्मा ।

२००. श्येनाकृतिश्च ।

२०१. विज्ञायते । (५)

२०२. उभयं ब्राह्मणम् ।

२०३. पञ्च दक्षिणायाᳪश्रोण्यामुपदधाति पञ्चोत्तरस्याम् । वस्तो वय इति दक्षिणेऽᳪस उपदधाति । वृष्णिर्वय इत्युत्तरे । व्याघ्रो वय इति दक्षिणे पक्ष उपदधाति । सिᳪहो वय इत्युत्तरे । पुरुषो वय इति मध्य इति च ।

२०४. अथापरम् । वयसां व एष प्रतिमया चीयते यदग्निरिति ।

२०५. उत्पततां छाययेत्यर्थः ।

२०६. समचतुरस्राभिरग्निं चिनुते दैव्यस्य च मानुषस्य च व्यावृत्त्या इति मैत्रायणीयब्राह्मणं भवति । (१०)

२०७. तस्येष्टकाः कारयेत्पुरुषस्य चतुर्थेन पञ्चमेन षष्ठेन दशमेनेति ।

२०८. अथाग्निं विमिमीते ।

२०९. यावान्पुरुष ऊर्ध्वबाहुस्तावदन्तराले वेणोश्छिद्रे करोति ।

२१० मध्ये तृतीयम् ।

२११ यदमुत्र स्पन्द्यया करोति तदिह वेणुना करोति । (१५)

२१२. तस्यात्मा ।

२१३. समचतुरस्रश्चत्वारः पुरुषाः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२१४. पक्षः समचतुरस्रः पुरुषः ।

२१५. स तु दक्षिणतोऽरत्निना द्राघीयान् ।

२१६. एतेनोत्तरः पक्षो व्याख्यातः । (२०)

२१७. पुच्छः समचतुरस्रः पुरुषः ।

२१८. तमवस्तात्प्रादेशेन वर्धयेत् ।

२१९. एवꣳसारत्नि प्रादेशः सप्तविधः संपद्यते ।

२२०. उपधाने पक्षाग्रादुत्तरतः पुरुषतृतीयवेलायाम् ।

२२१. चतस्रः पञ्चम्यस्तासामभितो द्वे द्वे पादेष्टके । (२५)

२२२. ततोऽष्टौ चतुर्थ्यः ।

२२३. पक्षशेषꣳ षड्भागीयाभिः प्रच्छादयेत् ।

२२४. एतेनोत्तरः पक्षो व्याख्यातः ।

२२५. पूर्वापरयोः पुच्छपार्श्वयोश्चतुर्भागीया उपदध्यात् ।

२२६. दक्षिणोत्तरयोः पादेष्टकाः । (३०)

२२७. शेषमग्निं पञ्चमभागीयाभिः प्रच्छादयेत् ।

२२८. एष द्विशतः प्रस्तारः ।

२२९. अपरस्मिन्प्रस्तारे ।

२३०. पक्षाग्रादुत्तरतोऽर्धव्यायामवेलायां तिस्रस्तिस्रः षष्ठ्यो द्वे द्वे द्विपदे इति विपर्यासमुपदध्यात् ।

२३१. तथोत्तरे । (३५)

२३२. दक्षिणस्याꣳ श्रोण्यां नव षष्ठ्यश्चतुरस्रकृताः ।

२३३. तथोत्तरस्याम् ।

२३४. नव नव षष्ठ्यो द्वे द्वे द्विपदे इति दक्षिणादꣳसादोत्तरादꣳसाद्विपर्यासमुपदध्यात् ।

२३५. शेषमग्निं पञ्चमभागीयाभिः प्रच्छादयेत् ।

२३६. एष द्विशतः प्रस्तारो व्यत्यासं चिनुयाद्यावतः प्रस्ताराꣳश्चिकीर्षेत् । (४०)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नवमः खण्डः

२३७. अथापरः । (१)

२३८. पुरुषस्य पञ्चम्यः ।

२३९. ता एवैकतोऽध्यर्धाः ।

२४०. तासामर्ध्याः ।

२४१. पाद्याश्च । (५)

२४२. उपधाने ।

२४३. पूर्वापरयोः पक्षपार्श्वयोरर्धेष्टका उदीचीरुपदध्यात् ।

२४४. तथोत्तरे ।

२४५. दक्षिणोत्तरयोः पुच्छपार्श्वयोश्चतस्रश्चतस्रोऽध्यर्धा उदीचीः ।

२४६. पुच्छस्यावस्ताच्चतस्रोऽर्धेष्टका उदीचीः । (१०)

२४७. तासामभितो द्वे पादेष्टके ।

२४८. जघनेन पुच्छाप्यययोरेकैकामर्धेष्टकां प्राचीम् ।

२४९. शेषमग्निं पञ्चमभागीयाभि प्रच्छादयेत् ।

२५०. एष द्विशतः प्रस्तारः ।

२५१. अपरस्मिन्प्रस्तार आत्मस्रक्तिषु चतस्रः पादेष्टका उपदध्यात् । (१५)

२५२. तासामभितो द्वे द्वे अर्धेष्टके ।

२५३. पूर्वस्मिन्ननीके पञ्च ।

२५४. पक्षाग्रयोस्तिस्रस्तिस्रोऽध्यर्धा उदीचीः ।

२५५. तासामन्तरालेष्वेकैकामर्धेष्टां प्राचीम् ।

२५६. शेषमग्निं पञ्चमभागीयाभिः प्रच्छादयेत् । (२०)

२५७. एष द्विशतः प्रस्तारः । व्यत्यासं चिनुयाद्यावतः प्रस्ताराँश्चिकीर्षेत् । (२१)

इति तृतीयोऽध्यायः ।

———

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थोऽध्यायः

दशमः खण्डः

२५८. अथ वक्रपक्षो व्यस्तपुच्छः । (१)

२५९. तस्येष्टकाः कारयेत्पुरुषस्य चतुर्थ्यः ।

२६०. तासामर्ध्याः पाद्याश्च ।

२६१. नित्यमक्ष्णयापच्छेदनमनादेशे ।

२६२. पादेष्टकाश्चतुर्भिः परिगृह्णीयात् । (५)

२६३. अर्ध पदेन पदेनाध्यर्धपदेन पदसविशेषेणेति ।

२६४. ते द्वे यथा दीर्घसꣳश्लिष्टे स्यातां तथार्धेष्टकां कारयेत् ।

२६५. अथाग्निं विमिमीते । आत्मा द्विपुरुषायामो दशपदव्यासः ।

२६६. तस्य दक्षिणादꣳसादुत्तरतोऽध्यर्धप्रक्रमे लक्षणं करोति ।

२६७. एवमपरतः । (१०)

२६८. तयोरुपरिष्टात्स्पन्द्यां नियम्याꣳस समपच्छिन्द्यात् ।

२६९. एतेनेतरासाꣳस्रक्तीनामपच्छेदा व्याख्याताः ।

२७०. स आत्मा ।

२७१. शिरोऽर्धषष्ठपदायाममर्धपुरुषव्यासम् । तस्याꣳसौ प्रक्रमेण-प्रक्रमेणापच्छिन्द्यात् । (१५)

२७२. पुच्छस्य षट्पदा प्राची द्विपुरुषोदीची ।

२७३. तस्य पूर्वे स्रक्ती त्रिभिस्त्रिभिः प्रक्रमैरपच्छिन्द्यात् ।

२७४. पक्षो द्वादशपदायामो दशपदव्यासः ।

२७५. तस्य मध्यात्प्राञ्चि षट् पदानि प्रक्रम्य शङ्कुं निहन्यात् ।

२७६. श्रोण्योरेकैकम् ।

२७७. अथैनाꣳस्पन्द्यया परिचिनुयात् । (२०)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२७८. अन्तस्पन्द्यमपच्छिद्य तत्पुरस्तात्प्राञ्चं दध्यात् ।

२७९. स निर्णामः ।

२८०. एतेनोत्तरस्य पक्षस्य निर्णामो व्याख्यातः ।

२८१. पक्षाग्रयोः प्रक्रमप्रमाणानि पञ्चपञ्च चतुरस्राण्यनूचीनानि-कृत्वा सर्वाण्यवाञ्चमक्ष्णयापच्छिन्द्यादर्धान्युद्धरेत् ।

२८२. एवꣳसारत्निप्रादेशः सप्तविधः संपद्यते । (२५)

२८३. उपधाने शिरसोऽप्यये चतुर्थीमुपदध्यात् ।

२८४. हꣳसमुखीं पुरस्तात् ।

२८५. पादेष्टके अभितः ।

२८६. तयोरवस्तादभितस्तिस्रस्तिस्रश्चतुरस्रपाद्याः ।

२८७. शेषे पादेष्टकाः । (३०)

२८८. अपि वा शिरसोऽग्रे हꣳसमुखीमुपदध्यात् । तस्या अवस्ताच्चतुर्थीमुपदध्यात्पादेष्टके अभितः । तयोरवस्तादभितस्तिस्रस्तिस्रश्चतुरस्रपाद्याः शेषे पादेष्टकाः ।

२८९. शिरसोऽवस्तात्पञ्च पादेष्टका व्यतिषक्ता उपदध्यात् ।

२९०. तथा पुच्छस्य पुरस्तात् ।

२९१. यद्यदपच्छिन्नं तस्मिन्नर्धेष्टकाः पादेष्टकाश्चोपदध्यात् ।

२९२. शेषमग्निं चतुर्भागीयाभिः प्रच्छादयेत् । (३५)

२९३. पाद्याभिः साध्यर्याभिः संख्यां पूरयेत् ।

२९४. एष द्विशतः प्रस्तारोऽपरस्मिन्प्रस्तारे हꣳसमुखीश्चतस्रश्चतसृभिः पादेष्टकाभिः संयोजयेद्यथा दीर्घचतुरस्रꣳसंपद्यते । तत्तिर्यक् स्वयमातृण्णावकाश उपदध्यात् ।

२९५. हꣳसमुख्यौ प्रतीच्यौ पुच्छाप्ययेऽर्धपदेनात्मनि विशये ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२९६. तयोरवस्तादभितस्तिस्रः पादेष्टकाः प्राङ्मुखीरुपदध्यात् ।

२९७. पुच्छस्यावस्तात्पञ्चदश पादेष्टका व्यतिषक्ता उपदध्यात् । (४०)

२९८. पादेष्टके अर्धेष्टकेति पक्षपत्राणां प्राचीर्व्यत्यासं चिनुयात् ।

२९९. विशये यदपच्छिन्नं तस्मिन्नर्धेष्टकाः पादेष्टकाश्चोपदध्यात् ।

३००. शेषमग्निं चतुर्भागीयाभिः प्रच्छादयेत् । पाद्याभिः साध्यर्धाभिः संख्यां पूरयेत् । (४३)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकादशः खण्डः

३०१. अथापरः । (१)

३०२. पुरुषस्य पञ्चमीभिः शतमशीतिः सप्तार्धं च सारत्निप्रादेशः सप्तविधः संपद्यते ।

३०३. तासां पञ्चाशद् द्वे चात्मनि ।

३०४. अर्धचतुर्थ्यः शिरसि ।

३०५. पञ्चदश पुच्छे । (५)

३०३. अष्टपञ्चाशत्साध्यर्या दक्षिणे पक्ष उपदध्यात् ।

३०७. तथोत्तरे ।

३०८. अर्धव्यायामेन स्रक्तीनामपच्छेदः ।

३०९. संनतं पुच्छम् ।

३१०. पक्षयोस्त्रिभिस्त्रिभिररत्निभिरपनामः । (१०)

३११. अध्यर्ध्याभिः षट्षट् पत्राणि कुर्यात् ।

३१२. आकृतिः शिरसो नित्या ।

३१३. अथेष्टकानां विकाराः ।

३१४. पुरुषस्य पञ्चम्यः । ता एवैकतोऽध्यर्धाः ।

३१५. ता एवैकतः सपादाः । (१५)

३१६. पञ्चमभागीयायाः साध्यर्याः पाद्याः ।

३१७. तथाध्यर्धायाः ।

३१८. तयोश्चाष्टमभागौ तथा श्लेषयेद्यथा तिस्रः स्रक्तयो भवन्ति ।

३१९. पञ्चमभागीयायाश्चाष्टम्यः ।

३२०. तानि दश । (२०)

३२१. आत्मनि पञ्चमभागीयाः साध्यर्या उपदध्यात् ।

३२२. तथा पुच्छे ।

३२३. पक्षयोश्चाध्यर्धाः साध्यर्याः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३२४. शिरसि याः संभवन्ति ।

३२५. अपरस्मिन् प्रस्तारे पूर्वयोः पक्षाप्ययोरेकैकामुभयीमुपदध्यात् । (२५)

३२६. एकैकामपरयोः ।

३२७. द्वे द्वे शिरसः पार्श्वयोः ।

३२८. पुच्छस्यावस्तादध्यर्धाः प्राचीर्यथावकाशम् ।

३२९. पार्श्वयोः पाद्याः साष्टमभागाः ।

३३०. पक्षयोश्चाध्यर्धाः सावयवाः । (३०)

३३१. शेषं यथायोगं यथासंख्यं यथाधर्मं चोपदध्यात् । (३१)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वादशः खण्डः

३३२ कङ्कचित एतेनात्मा पुच्छं च व्याख्यातम् । (१)

३३३. शिरसि पंचोपदध्यात् ।

३३४. तस्याकृतिर्व्याख्याता ।

३३५. सप्तपञ्चाशद्दक्षिणे पक्ष उपदध्यात् ।

३३६. तथोत्तरे । (५)

३३७. व्यायामेन सप्रादेशेन पक्षयोरपनामः ।

३३८. पञ्चमभागीयाध्यर्धाभिः षट्षट् पत्राणि कुर्यात् ।

३३९. अध्यर्धाविशिष्यते ।

३४०. तया पुच्छस्यावस्तात्पादावरत्निमात्रावरत्न्यन्तरालौ प्रादेशव्यासौ भवतः ।

३४१. तयोरवस्तादभितो द्वौ द्वावष्टमभागौ प्राग्भेदावुपदध्यात् । (१०)

३४२. अथेष्टकानां विकाराः । पञ्चमभागीयाः सावयवाः ।

३४२. एवञ्ञ्सारत्निप्रादेशः सप्तविधः संपद्यते ।

३४४. पादेष्टकां चतुर्भिः परिगृह्णीयात् ।

३४५. अर्धप्रादेशेनाध्यर्धप्रादेशेन प्रादेशेन प्रादेशसविशेषेणेति ।

३४६. अध्यर्धेष्टकां चतुर्भिः परिगृह्णीयादर्धव्यायामेन द्वाभ्यामरत्निभ्यामरत्निः सविशेषेणेति । (१५)

३४७. ताः षट् ।

३४८. तासां चतुरस्रपाद्याः साष्टमभागाः पादयोरुपधाय शेषं यथायोगं यथासंख्यं यथाधर्म चोपदध्यात् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रयोदशः खण्डः

३४९. अलजचित एतेनात्मा शिरः पुच्छं च व्याख्यातं पादावपोद्धृत्य ।

३५०. त्रिषष्टिर्दक्षिणे पक्ष उपदध्यात् ।

३५१. तथोत्तरे ।

३५२. पुरुषेण पक्षयोरपनामः ।

३५३. अपरस्मादपनामात्प्राञ्चमरत्निं मित्वा तस्मिन्स्पद्यां नियम्यापरं पक्षपत्नापच्छेदमन्वायच्छेत् । (५)

३५४. एवं पञ्च पञ्चम्यः साध्यो उद्धृता भवन्ति ।

३५५. पादेष्टकामपनाम उपधाय ।

३५६. तासां चतुरस्रपाद्याः साष्टमभागा अपोद्धृत्य शेषं यथायोगं यथासंख्यं यथाधर्मं चोपदध्यात् । (८)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्दशः खण्डः

३५७. प्रउगचितं चिन्वीतेति। (१)

३५८. यावानग्निः सारत्निप्रादेशस्तावत्प्रउगं कृत्वा तस्यापरस्याः करण्या द्वादशेनेष्टकास्तदर्धव्यासाः कारयेत्।

३५९. तासामध्यर्धाः पाद्याश्च।

३६०. तासां द्वे अर्धेष्टके बाह्यसविशेषे चुबुक उपदध्यात्।

३६१. अध्यर्धाश्चान्तयोः। (५)

३६२. शेषमग्निं बृहतीभिः प्रच्छादयेत्। अर्धेष्टकाभिः संख्यां पूरयेत्।

३६३. अपरस्मिन्प्रस्तारेऽपरस्मिन्ननीके सप्तचत्वारिंशशतपादेष्टका व्यतिषक्ता उपदध्यात्।

३६४. चुबुक एकांशशूलपाद्याम्।

३६५. दीर्घे चेतरे चतस्रः स्वयमातृण्णावकाश उपदध्यात्।

३६६. अध्यर्धाश्चान्तयोः। (१०)

३६७. शेषमग्निं बृहतीभिः प्राचीभिः प्रच्छादयेत्। अर्धेष्टकाभिः संख्यां पूरयेत्। (११)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चदशः खण्डः

३६८. उभयतः प्रउगं चिन्वीतेति । (१)

३६९. यावानग्निः सारत्निप्रादेशस्तावदुभयतः प्रउगं कृत्वा ।

३७०. नवमेन तिर्यङ्मान्याः प्रउगचितोक्ता विकाराः ।

३७१. तथोपधानम् ।

३७२. अपरस्मिन्प्रस्तारे चुबुकयोर्द्वे पादेष्टके उपदध्यात् ।

३७३. संध्यन्तयोश्च दीर्घपाद्ये ।

३७४. दीर्घे चेतरे च चतस्रः स्वयमातृण्णावकाश उपदध्यादध्यर्धशिचान्तयोः शेषमग्निं बृहतीभिः प्राचीभिः प्रच्छादयेत् । अर्धेष्टकाभिः संख्यां पूरयेत् । (७)

इति चतुर्थोऽध्यायः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पंचमोऽध्यायः

षोडशः खण्डः

३७५ रथचक्रचितं चिन्वीतेति विज्ञायते । (१)

३७६. द्वयानि तु खलु रथचक्राणि भवन्ति ।

३७७. साराणि च प्रधियुक्तानि च ।

३७८. अविशेषात्ते मन्यामहे । अन्यतरस्याकृतिरिति ।

३७९. अथाग्निं विमिमीते । यावानग्निः सारत्निप्रादेशस्तावतीं भूमिं परिमण्डलां कृत्वा तस्मिन्यावत्संभवेत्तावत्समचतुरस्रं कृत्वा । (५)

३८०. तस्य करण्या द्वादशेनेष्टकाः कारयेत् ।

३८१. तासां षट् प्रधावुपधाय शेषमष्टधा विभजेत् ।

३८२. अपरं प्रस्तारं तथोपदध्याद्यथा प्रध्यनीकेषु स्रक्तयो भवन्ति ।

३८४. अथापरः ।

३८५. पुरुषार्धात्पञ्चदशेनेष्टकाः समचतुरस्राः कारयेन्मानार्थाः । (१०)

३८५. तासां द्वे शते पञ्चविंशतिश्च सारत्निप्रादेशः सप्तविधः संपद्यते ।

३८६. तास्वन्याश्चतुः षष्टिमावपेत् ।

३८७. ताभिः समचतुरस्रं करोति ।

३८८. तस्य षोडशेष्टका पार्श्वमानी भवति ।

३८९. त्रयस्त्रिंशदतिशिष्यन्ते । (१५)

३९०. ताभिरन्तान्सर्वतः परिचिनुयात् ।

३९१. नाभिः षोडश मध्यमाः ।

३९२. चतुःषष्टिरराः । चतुःषष्टिर्वेदिः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३६३. नेमिः शेषाः ।

३६४. नाभिमन्ततः परिलिखेत् । (२०)

३६५. नेमिमन्ततश्चान्तरतश्च परिलिख्य ।

३६६. नेमिनाभ्योरन्तरालं द्वात्रिंशधा विभज्य विपर्यासं भागानुद्धरेत् ।

३६७. एवमावाप उद्धृतो भवति ।

३६८. नेमिं चतुः षष्टिं कृत्वा व्यवलिख्य मध्ये परिकृषेत् ।

३६९. ता अष्टाविंशतिशतं भवन्ति । (२५)

४००. अरांश्चतुर्धाचतुर्धा (विभजेत्) ।

४०१. नाभिमष्टधा विभजेत् ।

४०२. एष प्रथमः प्रस्तारः । अपरस्मिन् प्रस्तारे ।

४०३. नाभिमन्ततश्चतुर्थवेलायां परिकृषेत् ।

४०४. नेमिमन्तरतः । (३०)

४०५. नेमिमन्तरतश्चतुःषष्टिं कृत्वा व्यवलिखेत् ।

४०६. अराणां पञ्चधा विभाग आ परिकर्षणयोः ।

४०७. नेम्यामन्तरालेषु द्वे द्वे ।

४०८. नाभ्यामन्तरालेष्वेकैकाम् ।

४०९. यच्छेषं नाभेस्तदष्टधा विभजेत् । (३५)

४१०. स एष षोडशकरणः सारो रथचक्रचित् । (३६)

इति पञ्चमोऽध्यायः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षष्ठोऽध्यायः

सप्तदशः खण्डः

४११. द्रोणचितं चिन्वीतेति विज्ञायते । (१)

४१२. द्वयानि तु खलु द्रोणानि भवन्ति ।

४१३. चतुरस्राणि च परिमण्डलानि च ।

४१४. अविशेषात्ते मन्यामहे । अन्यतरस्याकृतिरिति ।

४१५. अथाग्निं विमिमीते । चतुरस्र आत्मा भवति । (५)

४१६. तस्य त्रयः पुरुषास्त्रिभागोनाः पार्श्वमानी (भवति) ।

४१७. पश्चात्त्सरुर्भवति ।

४१८. तस्यार्धपुरुषो दशांगुलानि च प्राची ।

४१९. त्रिभागोनः पुरुष उदीचीति ।

४२०. एवञ्‌ सारत्निप्रादेशः सप्तविधः संपद्यते । (१०)

४२१. अथेष्टकानां विकाराः पुरुषस्य षष्ठ्यस्ता । एवैकतोऽध्यर्धाः । तासामध्यर्धास्तिर्यग्भेदाः पुरुषस्य चतुर्थ्य इति ।

४२२. तासां त्सरुश्रोण्यन्तरालयोः षट् षट् षष्ठीरुपधाय शेषमग्निं बृहतीभिः प्रच्छादयेत् ।

४२३. अर्धेष्टकाभिः संख्यां पूरयेत् ।

४२४. अपरस्मिन्प्रस्तारे दक्षिणोऽंससेऽध्यर्धामुदीचीमुपदध्यात् ।

४२५. तथोत्तरे । (१५)

४२६. पूर्वस्मिन्ननीके षड्भागीया उपदध्यात् ।

४२७. दक्षिणोत्तरयोश्चतुर्भागीयाः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

४२८. दसरोः पुरस्तात्पार्श्वयोर्द्वे चतुर्भागीये उपदध्यात् ।

४२९. तयोरवस्तादभितो द्वे द्वे अध्यर्धे विषूची ।

४३०. तयोरवस्तान्मध्यदेशे द्वे षष्ठ्यौ प्राच्यौ । (२०)

४३१. शेषमग्निं बृहतीभिः प्रच्छादयेत् ।

४३२. अर्धेष्टकाभिः संख्यां पूरयेत् । (२२)

इति षष्ठोऽध्यायः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सप्तमोऽध्यायः

अष्टादशः खण्डः

४३३. अथापरः । (१)

४३४. पुरुषस्य षोडशीभिर्विꣳशशतꣳ सारत्निप्रादेशः सप्तविधः संपद्यते ।

४३५. तासामेकामपोद्धृत्य शेषाः परिमण्डलं करोति ।

४३६. तत्पूर्वेण रथचक्रचिता व्याख्यातम् ।

४३७. षोडशीं पुरस्ताद्विशय उपधाय तया सह मण्डलं परिलिखेत् । (५)

४३८. यदवस्तादपच्छिन्नं तत्पुरस्तादुपदध्यात् ।

४३९. प्रधीनाꣳसप्तधा विभागः ।

४४०. प्रधिमध्यमाः प्रक्रमव्यासा भवन्ति ।

४४१. चतुरस्राणामर्ध्याभिः संख्यां पूरयेत् ।

४४२. अपरस्मिन्प्रस्तारे । (१०)

४४३. प्रधिमध्यमामोष्ठ उपधाय यदवस्तात्तद् द्वेधा विभजेत् ।

४४४. स एष नवकरणो द्रोणचित्परिमण्डलः ।

४४५. समूह्यपरिचाय्यौ पूर्वेण रथचक्रचिता व्याख्यातौ ।

४४६. समूह्यस्य दिक्षु चात्वालान्खानयित्वा तेभ्यः पुरीषꣳ समूह्योपदध्यात् ।

४४७. परिचाय्य इष्टकानां देशभेदः । (१५)

४४८. तꣳ सर्वाभिः प्रदक्षिणं परिचिनुयात् । (१६)

इति सप्तमोऽध्यायः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अष्टमोऽध्यायः

एकोनविंशः खण्डः

४४९. श्मशानचितं चिन्वीतेति विज्ञायते। सर्वमग्निं चतुरस्रान्पञ्चदश भागान्कृत्वा। (१)

४५०. तेषामाख्यातमुपधानम्।

४५१. त्रिभिर्भागैर्भागार्धव्यासं दीर्घचतुरस्रं विहृत्य पूर्वस्याःकरण्या मध्याच्छ्रोणी प्रत्यालिख्यान्तावुद्धरेत्।

४५२. तस्य दशधा विभागः।

४५३. तानि विंशतिः सर्वेऽग्निः संपद्यते। (५)

४५४. अपरस्मिन्प्रस्तारे।

४५५. प्रउगमध्येऽनूचीनं विभजेत्।

४५६. तस्य षड्धा विभागः।

४५७. ते द्वे पार्श्वयोरुपदध्यात्।

४५८. भागतृतीयायामाश्चतुर्थव्यासाः कारयेत्। (१०)

४५९. तासामर्ध्यास्तिर्यग्भेदाः।

४६०. ता अन्तयोरुपधाय शेषमग्निं बृहतीभिः प्राचीभिः प्रच्छादयेत्।

४६१. अर्धेष्टकाभिः संख्यां पूरयेत्।

४६२. ऊर्ध्वप्रमाणमग्नेः पञ्चमेन वर्धयेत्।

४६३. तत्सर्वं त्रेधा विभज्य द्वयोर्भागयोश्चतुर्थेन वा नवमेन वा चतुर्दशेन वेष्टकाः कारयेत्। (१५)

४६४. ताभिश्चतस्रो वा नव वा चतुर्दश वा चितीरुपधाय शेषमवाञ्चमक्षणयापच्छिन्द्यात्। अर्द्धमुद्धरेत्।

४६५. तस्य नित्यो विभागः। यथायोगमिष्टकानांह्रासवृद्धी। (१७)

इति अष्टमोऽध्यायः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नवमोऽध्यायः

विंशः खण्डः

४६६. कूर्मचितं चिन्वीत यः कामयेत ब्रह्मलोकमभिजयेयमिति विज्ञायते । (१)

४६७. द्वयाः खलु कूर्मा भवन्ति वक्राङ्गाश्च परिमण्डलाश्च ।

४६८. अविशेषात्ते मन्यामहे । अन्यतरस्याकृतिरिति ।

४६९. अथाग्निं विमिमीते । चतुरस्र आत्मा भवति । तस्य दश प्रक्रमाः पार्श्वमानी भवति ।

४७०. तस्य द्वाभ्यां द्वाभ्यां प्रक्रमाभ्याᳬं स्रक्तीनामपच्छेदः । (५)

४७१. पूर्वस्मिन्ननीके प्रक्रमप्रमाणानि चत्वारि चतुरस्राणि कृत्वा तेषां ये अन्त्ये ते अक्ष्णयापच्छिन्द्यात् ।

४७२. एवं दक्षिणत एवं पश्चादेवमुत्तरतः !

४७३. स आत्मा ।

४७४. शिरः पञ्चपदायाममर्धपुरुषव्यासम् ।

४७५. तस्याᳬं सौ प्रक्रमेण प्रक्रमेणापच्छिन्द्यात् । (१०)

४७६. स्रक्त्यपच्छेदे पादानुन्नयेत् ।

४७७. तस्य द्विपदाक्ष्णया तिरश्ची तद्द्विगुणायाममनूची ।

४७८. तस्य द्विपदाक्ष्णया पूर्वमᳬंसमपच्छिन्द्यात् ।

४७९. एतेनेतरेषां पादानामपच्छेदा व्याख्याताः ।

४८०. अपरयोः पादयोरपरावᳬंसावपच्छिन्द्यात् । (१५)

४८१. एवᳬं सारत्निप्रादेशः सप्तविधः संपद्यते ।

४८२. तस्येष्टकाः कारयेत्पुरुषस्य चतुर्थ्यः । तासामर्ध्याः पाद्याश्च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

४८३. अध्यर्धापाद्याश्चतुर्भिः परिगृह्णीयात्प्रक्रमेण द्वाभ्यां पदाभ्यां पदसविशेषेणेति ।

४८४. ते द्वे यथा दीर्घसंश्लिष्टे स्यातां तथैकां कारयेत् ।

४८५. द्विपदाक्ष्ण्यार्धेन समचतुरस्रामेकाम् । (२०)

४८६. उपधाने शिरसोऽग्रे चतुरस्रामुपदध्यात् ।

४८७. हंसमुख्यावस्तात् ।

४८८. पञ्च-पञ्च चतुरस्रा द्वे द्वे पादेष्टके इति पादेषूपदध्यात् ।

४८९. यद्यदपच्छिन्नं तस्मिन्नर्धेष्टका उपदध्यात् ।

४९०. शेषमग्निं चतुर्भागीयाभिः प्रच्छादयेत् । (२५)

४९१. अर्धेष्टकाभिः संख्यां पूरयेत् ।

४९२. अपरस्मिन्प्रस्तारे शिरसोऽग्रे हंसमुखीमुपदध्यात्पादेष्टके अभितः ।

४९३. तयोरवस्तादभितो द्वे द्वे अध्यर्धापाद्ये विषूची ।

४९४. तयोरवस्तादभितश्छेदसंहिते द्वे पादेष्टके ।

४९५. द्वे द्वे द्विपदे तिस्रस्तिस्रो ऽर्धेष्टका इति पादेषूपदध्यात् । (३०)

४९६. यद्यदपच्छिन्नं तस्मिन्नर्धेष्टकाः पादेष्टकाश्चोपदध्यात् ।

४९७. शेषमग्निं चतुर्भागीयाभिः प्रच्छादयेत् ।

४९८. अर्धेष्टकाभिः संख्यां पूरयेत् । (३३)

इति नवमोऽध्यायः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दशमोऽध्यायः

एकविंशः खण्डः

४९९. अथापरः । (१)

५००. पुरुषस्य षोडशीभिर्विंशशतं सारत्निप्रादेशः सप्तविधः संपद्यते ।

५०१. तासां पञ्चषोडशीरपोद्धृत्य शेषाः परिमण्डलं करोति ।

५०२. तदुत्तरेण द्रोणचिता व्याख्यातम् ।

५०३. अथ ताः पञ्चषोडश्यस्ताभिरवान्तरदिक्षु पादानुन्नयेत् । (५)

५०४. शिरः पुरस्तात् ।

५०५. तासां परिकर्षणं व्याख्यातम् ।

५०६. प्रधीनां सप्तधा विभागः । प्रधिमध्यमाः प्रक्रमव्यासा भवन्ति ।

५०७. यदतिरिक्तं संपद्यते तच्चतुरस्राणामध्यर्धाभिर्योयुज्येत ।

५०८. अपरस्मिन्प्रस्तारे । (१०)

५०९ पादानां शिरोवद्विभागः शिरसः पादवत् ।

५१०. व्यत्यासं चिनुयाद्यावतः प्रस्तारांश्चिकीर्षेत् ।

५११. कूर्मस्यान्ते तनुपुरीषमुपदध्यात् ।

५१२. मध्ये बहुलम् ।

५१३. एतदेव द्रोणे विपरीतम् । (१५)

५१४. अथ हैक एकविधप्रभृतीन्प्रउगादीन्ब्रुवते ।

५१५. समचतुरस्रानेक आचार्याः ।

५१६. तस्य करण्या द्वादशेनेष्टकाः कारयेत् । तासामध्यर्धाः पाद्याश्च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५१७. अथाश्वमेधिकस्याग्नेः पुरुषाभ्यासो नारत्निप्रादेशानाम् ।

५१८. प्राकृतो वा त्रिगुणः । (२०)

५१९. त्रिस्तावोऽग्निर्भवतीत्येकविंशोऽग्निर्भवतीत्युभयं ब्राह्मणमुभयं ब्राह्मणम् । (२१)

इति दशमोऽध्यायः

॥ इति बौधायन-शुल्बसूत्रं समाप्तम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आपस्तम्ब शुल्बसूत्रम्

[आपस्तम्बीय शुल्बप्रश्नः]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आपस्तम्ब शुल्ब-प्रश्नः

प्रथमः पटलः

प्रथमः खण्डः

१. विहारयोगान्व्याख्यास्यामः ।

२. यावदायामं प्रमाणम् ।

३. तदर्धमभ्यस्याऽपरस्मिस्तृतीये षड्भागोने लक्षणं करोति ।

४. पृष्ठ्यान्तयोरन्तौ नियम्य लक्षणेन दक्षिणापायम्य निमित्तं करोति ।

५. एवमुत्तरतो विपर्यस्येतरतस्स समाधिः ।

६. तन्निमित्तो निर्ह्रासो विवृद्धिर्वा ।

७. आयामं वाभ्यस्यागन्तुचतुर्थमायामस्याक्ष्णया रज्जुस्तिर्यङ्मानीशेषः ।

८. व्याख्यात विहरणम् ।

९. दीर्घस्याक्ष्णयारज्जुः पार्श्वमानी तिर्यङ्मानी च यत्पृथग्भूते कुरुतस्तदुभयं करोति ।

१०. ताभिर्ज्ञेयाभिरुक्तं विहरणम् ।

११. चतुरस्त्रयाक्ष्णयारज्जुर्द्विस्तावतीं भूमिं करोति ।

१२. समस्य द्विकरणी ।

१३. प्रमाणं तृतीयेन वर्धयेत्तच्चचतुर्थेनात्मचतुस्त्रिंशोनेन ।

१४. स विशेषः ।

१५. अथापरम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१६. प्रमाणमात्रीं रज्जुमुभयतः पाशां करोति ।

१७. मध्ये लक्षणमर्धमध्यमयोश्च पृष्ठ्यायां रज्जुमायम्य पाशयोर्लक्षणेष्विति शङ्कुं निहत्योपान्त्ययोः पाशौ प्रतिमुच्य मध्यमेन लक्षणेन दक्षिणापायम्य शङ्कुं निमित्तं करोति ।

१८. मध्यमे पाशौ प्रतिमुच्य उपर्युपरि निमित्तं मध्यमेन लक्षणेन दक्षिणापायम्य शङ्कुं निहन्ति ।

१९. तस्मिन्पाशं प्रतिमुच्य पूर्वस्मिन्नितरं मध्यमेन लक्षणेन दक्षिणमꣳसमायच्छेत् ।

२०. उन्मुच्य पूर्वस्मादपरस्मिन्प्रतिमुच्य मध्यमेनैव लक्षणेन दक्षिणाꣳश्रोणिमायच्छेत् ।

२१. एवमुत्तरौ श्रोण्यꣳसौ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीयः खण्डः

१. अथापरो योगः ।

२. पृष्ठ्यान्तयोर्मध्ये च शङ्कुं निहत्यार्धेऽर्धे तद्विशेषमभ्यस्य लक्षणं कृत्वार्धमागमयेत् ।

३. अन्त्ययोः पाशौ कृत्वा मध्यमे सविशेषं प्रतिमुच्य पूर्वस्मिन्नितरꣳ लक्षणेन दक्षिणमꣳ समायच्छेत् ।

४. उन्मुच्य पूर्वस्मादपरस्मिन्प्रतिमुच्य लक्षणेनैव दक्षिणाꣳ श्रोणिमायच्छेत् ।

५. एवमुत्तरौ श्रोण्यꣳसौ ।

६. प्रमाणं तिर्यग्द्विकरण्यायामः ।

७. तस्याक्ष्णयारज्जुस्त्रिकरणी ।

८. तृतीयकरण्येतेन व्याख्याता ।

९. विभागस्तु नवधा ।

१०. तुल्ययोश्चतुरस्रयोरुक्तस्समासः ।

११. नाना प्रमाणयोश्चतुरस्रयोस्समासः ।

१२. ह्रसीयसः करण्या वर्षीयसो वृद्ध्रमुल्लिखेत् ।

१३. वृद्ध्रस्याक्ष्णया रज्जुरुभे समस्यति ।

१४. तदुक्तम् ।

१५. चतुरस्राच्चतुरस्रं निर्जिहीर्षन् यावन्निर्जिहीर्षेत्तस्य करण्या वृद्ध्रमुल्लिखेत् ।

१६. वृद्ध्रस्य पार्श्वमानीमक्ष्णयेतरत्पार्श्वमुपसंहरेत् ।

१७. सा यत्र निपतेत्तदपच्छिन्द्यात् ।

१८. छिन्नया निरस्तम् ।

१९. उपसंहृताऽक्ष्णयारज्जुस्सा चतुष्करणी छिन्ना चेतरा च यत्पृथग्भूते कुरुतः तदुभयं करोति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२०. तिर्यङ्मानी पुरुषꣳ शेषस्त्रीन् ।

२१. तदुक्तम् ।

२२. दीर्घचतुरस्रꣳ समचतुरस्रं चिकीर्षन् तिर्यङ्मान्याऽपच्छिद्य शेषꣳ विभज्योभयत उपदध्यात् ।

२३. खण्डमागन्तुना संपूरयेत् ।

२४. तस्य निर्ह्रास उक्तः । (२१+२४=४५)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृतीयः खण्डः

१. समचतुरस्रं दीर्घचतुरस्रं चिकीर्षन् यावच्चिकीर्षेत् तावती पार्श्वमानीं कृत्वा यदधिकं स्याद्यथायोगमुपदध्यात् ।

२. चतुरस्रं मण्डलं चिकीर्षन मध्यात्कोटयां निपातयेत् ।

३. पार्श्वतः परिकृष्यातिशयतृतीयेन सहमण्डलं परिलिखेत् ।

४. सा नित्या मण्डलम् ।

५. यावद्धीयते तावदागन्तुम् ।

६. मण्डलं चतुरस्रं चिकीर्षन् विष्कम्भं पञ्चदश भागान् कृत्वा द्वावुद्धरेत् ।

७. त्रयोदशावशिष्यन्ते ।

८. सानित्या चतुरस्रम् ।

९. प्रमाणेन प्रमाणं विधीयते ।

१०. आदेशादन्यत् ।

११. द्वाभ्यां चत्वारि ।

१२. त्रिभिर्नव ।

१३. यावत्प्रमाणा रज्जुस्तावतस्तावतो वर्गान् करोति ।

१४. तथोपलब्धिः ।

१५. अध्यर्धपुरुषा रज्जुर्द्वौ सपादौ करोति ।

१६. अर्धतृतीयपुरुषा षट्सपादान् ।

१७. अथात्यन्तप्रदेशः ।

१८. यावता यावताऽधिकेन परिलिखति तत्पार्श्वयोरुपदधाति ।

१९. यच्च तेन चतुरस्रं क्रियते तत्कोटयाम् ।

२०. अर्धप्रमाणेन पादप्रमाणं विधीयते ।

२१. अर्धस्य द्वि प्रमाणायाः पादपूरणत्वात् ।

२२. तृतीयेन नवमी कला । (४५ + २२ = ६७)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीयः पटलः

चतुर्थः खण्डः

१. आग्न्याधेयिके विहारे गार्हपत्याहवनीययोरन्तराले विज्ञायते ।

२. अष्टासु प्रक्रमेषु ब्राह्मणो ऽग्निमादधीत ।

३. एकादशसु राजन्यः ।

४. द्वादशसु वैश्यः ।

५. चतुर्विंशत्यामपरिचिते यावता वा चक्षुषा मन्यते तस्मान्नातिदूरमाधेय इति सर्वेषामविशेषेण श्रूयते ।

६. दक्षिणतः पुरस्ताद्वितृतीयदेशे गार्हपत्यस्य नेदीयसि दक्षिणाग्नेर्विज्ञायते ।

७. गार्हपत्याहवनीययोन्तरालं पञ्चधा षड्धा वा संविभज्य षष्ठं सप्तमं वा भागं आगन्तुमुपसमस्य समं त्रेधं विभज्यापरस्मिंꣳस्तृतीये लक्षणं कृत्वा गार्हपत्याहवनीययोरन्तौ नियम्य लक्षणेन दक्षिणापायम्य निमित्तं करोति ।

८. तद्दक्षिणाग्नेरायतनम् ।

९. श्रुतिसामर्थ्यात् ।

१०. यजमानमात्री प्राच्यपरिमिता वा ।

११. यथासन्नानि हवीꣳषि संभवेदेवं तिरश्चीप्राञ्चौ ।

१२. वेद्यꣳसावुन्नयति ।

१३. प्रतीची श्रोणी ।

१४. पुरस्तादꣳहीयसी पश्चात्प्रथीयसी मध्ये सन्नततरा ।

१५. एवमिव हि योषेति दार्शिक्या वेदेर्विज्ञायते ।

१६. अपरेणाऽऽहवनीꣳ यजमानमात्री ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१७. दीर्घंचतुरस्रं विहृत्य तावतीं रज्जुमायम्य मध्ये लक्षणं कृत्वा दक्षिणयोश्श्रोण्यꣳसयोरन्तरा नियम्य लक्षणेन दक्षिणापायम्य निमित्तं करोति।

१८. निमित्ते रज्जुं नियम्यान्तौ समस्येत्।

१९. दक्षिणायाश्श्रोणेर्दक्षिणमꣳसमालिखेत्।

२६. एवमुत्तरतः।

२१. तिर्यङ्मानीं द्विगुणां तथा कृत्वा पश्चात्पुरस्ताच्चोपलिखेत्।

२२. विमितायां पुरस्तात् पार्श्वमान्या उपसꣳहरेत्।

२३. श्रुतिसामर्थ्यात्। (६७+२३=९०)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पंचमः खण्डः

१. त्रिंशत्पदानि प्रक्रमा वा पश्चात्तिरश्ची भवति ।

२. षट्त्रिंशत्प्राची चतुर्विंशतिः पुरतात्तिरश्चीति सौमिक्या वेदेर्विज्ञायते ।

३. षट्त्रिंशिकायामष्टादशोपसमस्य अपरस्मादन्ताद्द्वादशसु लक्षणं पञ्चदशसु लक्षणं पृष्ठ्यान्तयोरन्तौ नियम्य पञ्चदशकेन दक्षिणापायम्य शङ्कुं निहन्ति ।

४. एवमुत्तरतश्श्रोणी ।

५. विपर्यस्तयांसौ पञ्चदशकेनैवापायम्य द्वादशके शङ्कुं निहन्ति ।

५. एवमुत्तरतः ।

७. तावंसौ ।

८. तदेकरज्ज्वा विहरणम् ।

९. त्रिकचतुष्कयोः पञ्चिकाऽक्ष्णया रज्जुः ।

१०. ताभिस्त्रिरभ्यस्ताभिरंसौ ।

११. चतुरभ्यस्ताभिश्श्रोणी ।

१२. द्वादशिकापञ्चिकयोस्त्रयोदशिकाऽक्ष्णयारज्जुः ।

१३. ताभिरंसौ ।

१४. द्विरभ्यस्ताभिश्श्रोणी ।

१५. पञ्चदशिकाऽष्टिकयोः सप्तदशिकाऽक्ष्णया रज्जुः ।

१६. ताभिश्श्रोणी ।

१७. द्वादशिका पञ्चत्रिंशिकयोस्सप्तत्रिंशिकाऽक्ष्णयारज्जुः ।

१८. ताभिरंसौ ।

१९. एतावन्ति ज्ञेयानि वेदिविहरणानि भवन्ति ।

२०. अष्टाविंशशतयूनं पदसहस्रं महावेदिः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२१. दक्षिणस्मादंसाद् द्वादशसु दक्षिणस्यां श्रोण्यां निपातयेत्।

२२. छेदं विपर्यस्योत्तरत उपदध्यात् ।

२३. सा दीर्घा चतुरस्रा ।

२४. तथा युक्तां संचक्षीत ।

२५. सौमिक्यावेदेर्वितृतीयदेशे यजेतेति सौत्रामण्या वेदेर्विज्ञायते ।

२६. प्रक्रमस्य द्विकरणी प्रक्रमस्थानीया भवति ।

२७. त्रिकरणी वा ।

२८. अष्टिकादशिकेति तिर्यङ्मान्यौ ।

२९. द्वादशिका पृष्ठ्या ।

३०. त्रीणि चतुर्विंशानि पदशतानि सौत्रामणिकी वेदिः ।

३१. द्विस्तावा वेदिर्भवतीत्यश्वमेधे विज्ञायते । (९० + ३१ = १२१)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षष्ठः खण्डः

१. प्रक्रमस्य द्विकरणी प्रक्रमस्थानीया भवति ।

२. प्रक्रमो द्विपदस्त्रिपदो वा ।

३. प्रक्रमे याथाकामी ।

४. शब्दार्थस्य विशयित्वात् ।

५. यजमानस्याध्वर्योर्वा ।

६. एष हि चेष्टानां कर्ता भवति ।

७. रथमात्री निरूढपशुबन्धस्य वेदिर्भवतीति विज्ञायते ।

८. तस्य खल्वाहु रथाक्षमात्री पश्चात्तिर्यग् ।

९. ईषया प्राची ।

१०. विपथयुगेन पुरस्तात् ।

११. यावता वा बाह्ये छिद्रे ।

१२. तदेकरज्ज्वोक्तम् ।

१३. पञ्चदशिकेनैवापायम्याधक्षिणार्धयुगेन श्रोण्यंऽ सान्निर्हरेत् ।

१४. अथाप्युदाहरन्ति ।

१५. अष्टाशीतिशतमीषा ।

१६. तिर्यगक्षश्चतुश्शतम् ।

१७. षडशीतियुगं च ।

१८. अस्य रथश्चारण उच्यते ।

१९. इति रथपरिमाणम् ।

२०. अरत्निभिर्वा ।

२१. चतुर्भिः पश्चात् ।

२२. षड्भिः प्राची ।

२३. त्रिभिः पुरस्तात् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२४. तदेकरज्ज्वोक्तम् ।

२५. पञ्चदशिकेनैवापायभ्य द्वाभ्यामध्यर्धेनेति श्रोण्यꣳसान्निर्हरेत् ।

२६. यजमानमात्री चतुस्त्रक्तिर्भवतीति पैतृक्या वेदेर्विज्ञायते ।

२७. तदेकरज्ज्वोक्तम् ।

२८ पञ्चदशिकेनैवापायम्यार्धेन ततश्श्रोण्यꣳसान्निर्हरेत् ।

२९. दशपदीत्तरा वेदिर्भवतीति सोमे विज्ञायते ।

३०. तदेकरज्ज्वोक्तम् ।

३१. पञ्चदशिकेनैवापायम्यार्धेन ततश्श्रोण्यꣳसान्निर्हरेत् ।

३२. तां युगेन यजमानस्य वा पदैर्विमाय शम्यया परिमिमीते ।

३३. पदे युगेऽरत्नावियति शम्ययां च मानार्थेषु यथाकामी ।

३४. शब्दार्थस्य विशयित्वात् ।

३५. विमितायां पुरस्तात्पार्श्वमान्या उपसꣳहरेत् ।

३६. श्रुतिसामर्थ्यात् । (१२१ + ३६ = १५७)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सप्तमः खण्डः

१. नवारत्निनतिर्यक्सप्तविंशतिरुदगायतमिति सदसो विज्ञायते ।

२. अष्टादशेत्येकेषाम् ।

३. तदेकरज्ज्वोक्तम् ।

४. पञ्चदशिकेनैवापायम्यार्ध पञ्चमैश्श्रोण्यंसान्निर्हरेत् ।

५. प्रादेशमुखाः प्रादेशान्तराला भवन्तीत्युपरवाणां विज्ञायते ।

६. अरत्निमात्रं चतुरस्रं विहृत्य स्रक्तिषु शङ्कून्निहत्यार्धप्रादेशेन तं तं परिलिखेत् ।

७. श्रुतिसामर्थ्यात् ।

८. न्यायाममात्री भवतीति गार्हपत्यचितेर्विज्ञायते ।

९. चतुरस्रेत्येकेषाम् ।

१०. परिमण्डलेत्येकेषाम् ।

११. करणं व्यामस्य तृतीयायामं सप्तमव्यासं कारयेत् ।

१२. त एकविंशतिर्भवन्ति ।

१३. प्रागायामाः प्रथमे प्रस्तारे ।

१४. अपरस्मिन्नुदगायामाः ।

१५. मण्डलायां मृदो देहं कृत्वा मध्ये शङ्कुं निहत्यार्धव्यायामेन सहमण्डलं परिलिखेत् ।

१६. तस्मिंश्चतुरस्रमवदध्याद्यावत्सम्भवेत् ।

१७. तन्नवधा व्यवलिख्य त्रैधमेकैकं प्रधिकं विभजेत् ।

१८ उपाधाने चतुरस्रस्यावान्तरदेशान्प्रति स्रक्तीस्सम्पादयेत् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१९. मध्यानीतरस्मिन्प्रस्तारे ।

२०. व्यत्यासं चिनुयाद्यावतः प्रस्ताराँश्चिकीर्षेत् ।

२१. पिशीलमात्रा भवन्तीति धिष्ण्यानाँ विज्ञायते ।

२२. चतुरस्रा इत्येकेषाम् ।

२३. परिमण्डला इत्येकेषाम् ।

२४. मृदो देहान्कृत्वा ।

२५. आग्नीध्रीयं नवधा व्यवलिख्य एकस्यास्स्थानेऽश्मानमुपदध्यात् ।

२६. यथासंख्यमितरा व्यवलिख्य यथायोगमुपदध्यात् । (१५७+२६ =१८३)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृतीयः पटलः

अष्टमः खण्डः

१. भवतीव खलु वा एष योऽग्निं चिनुते इति विज्ञायते ।
२. वयसाꣳ वा एष प्रतिमया चीयत इत्याकृतिचोदनात् ।
३. प्रत्यक्षविधानाद्वा ।
४. यावदाम्नानेन ।
५. वेणुना चतुरस्त्रे आत्मनि पुरुषानवमिमीते ।
६. पुरुषं दक्षिणे पक्षे पुरुषं पुच्छे पुरुषमुत्तरे ।
७. अरत्निना दक्षिणतो दक्षिणं पक्षं वर्धयति ।
८. एवमुत्तरत उत्तरम् ।
९. प्रादेशेन वितस्त्या वा पश्चात्पुच्छम् ।
१०. एकविधः प्रथमोऽग्निः ।
११. द्विविधो द्वितीयः ।
१२. त्रिविधस्तृतीयः ।
१३. त एवमेवोद्यन्त्यैकशतविधात् ।
१४. तद्रु ह वै सप्तविधमेव चिन्वीत ।
१५. सप्तविधो वाव प्राकृतोऽग्निः ।
१६. तत ऊर्ध्वमेकोत्तरानिति विज्ञायते ।
१७. एकविधप्रभृतीनां न पक्षपुच्छानि भवन्ति ।
१८. सप्तविधवाक्यशेषत्वात् ।
१९. श्रुतिविप्रतिषेधाच्च ।
२०. अष्टविधप्रभृतीनां यदन्यत्सप्तम्यस्तत्सप्तधा विभज्य प्रतिपुरुषमावेशयेत् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२१. आकृतिविकारस्याश्रुतत्वात् ।

२२. पुरुषमात्रेण विमिमीते, वेणुना विमिमीते, इति विज्ञायते ।

२३. यावान्यजमान ऊर्ध्वबाहुस्तावदन्तराले वेणोश्छिद्रे करोति मध्ये तृतीयम् ।

२४. अपरेण यूपावटदेशमनुपृष्ठ्यं वेणुं निधाय छिद्रेषु शंकून्निहत्य उन्मुच्यापराभ्यां दक्षिणा प्राक्परिलिखेदान्तात् ।

२५. उन्मुच्य पूर्वस्मादपरस्मिन्प्रतिमुच्य दक्षिणा प्रत्यक् परिलिखेदान्तात् । (१८३ + २५ = २०८)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नवमः खण्डः

१. उन्मुच्य वेणुं मध्यमे शङ्क्वावन्त्यꣳ वेणोश्छिद्रं प्रतिमुच्योपर्युपरि-लेखासमरं दक्षिणा वेणुं निधायान्त्ये छिद्रे शङ्कुं निहत्य तस्मिन्मध्यमꣳ वेणोश्छिद्रं प्रतिमुच्य लेखान्तयोरितरे प्रतिष्ठाप्य छिद्रयोश्शङ्कू निहन्ति ।

२. स पुरुषश्चतुरस्रः ।

३. एवं प्रदक्षिणं चतुर आत्मनि पुरुषानवमिमीते ।

४. पुरुषं दक्षिणो पक्षे ।

५. पुरुषं पुच्छे ।

६. पुरुषमुत्तरे ।

७. अरत्निना दक्षिणतो दक्षिणम् ।

८. इत्युक्तम् ।

९. पृष्ठ्यातो वा पुरुषमात्रस्याक्ष्णया वेणुं निधाय पूर्वस्मिन्नितरम् ।

१०. ताभ्यां दक्षिणमꣳसं निर्हरेत् ।

११. विपर्यस्य श्रोणी ।

१२. पूर्ववदुत्तरमꣳसम् ।

१३. रज्ज्वा वा विमायोत्तरवेदिन्यायेन वेणुना विमिमीते ।

१४. स पक्षपुच्छेषु विधाभ्यासेऽपचये च विधा सप्तमकरणीं पुरुषस्थानीयां कृत्वा विहरेत् ।

१५. करणानीष्टकानाम् ।

१६. पुरुषस्य पञ्चमेन कारयेत् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१७. तासामेवैकतोऽध्यर्धास्तद् द्वितीयम् ।

१८. पुरुषस्य पञ्चमो भाग एकतः प्रादेश एकतः तत्तृतीयम् ।

१९. सर्वतः प्रादेशस्तच्चतुर्थम् ।

२०. समचतुरस्राः पञ्चदशभागीयास्ततपञ्चमम् ।

२१. ऊर्ध्वप्रमाणमिष्टकानां जानोः पञ्चमेन कारयेत् ।

२२. अर्धेन नाकसदां पञ्चचूडानां च ।

२३. यत्पच्यमानानां प्रतिह्रसीत पुरीषेण तत्सम्पूरयेत् ।

२४. अनियतपरिमाणत्वात्पुरीषस्य। (२०८ + २४ = २३२)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दशमः खण्डः

१. उपधानेऽध्यर्धा दश पुरस्तात्प्रतीचीरात्मन्युपदधाति ।

२. दश पश्चात्प्राचीः ।

३. पञ्चपञ्च पक्षाग्रयोः ।

४. पक्षाप्यय योश्च विशयाः ।

५. तासामर्धेष्टकामात्राणि पक्षयोर्भवन्ति ।

६. पञ्चपञ्च पुच्छपार्श्वयोर्दक्षिणाः उदीचीश्च ।

७. पुच्छे प्रादेशमुपधाय सर्वमग्निं पञ्चमभागीयाभिः प्रच्छादयेत् ।

८. पञ्चदशभागीयाभिः संख्यां पूरयेत् ।

९. अपरस्मिन्प्रस्तारेऽध्यर्धा दश दक्षिणत उदीचीरात्मन्युपदधाति ।

१०. दशोत्तरतो दक्षिणाः ।

११. यथा प्रथमे प्रस्तारे पक्षौ तथा पुच्छम् ।

१२. यथा पुच्छं तथा पक्षौ ।

१३. विपरीता अप्यये ।

१४. सर्वमग्निं पञ्चमभागीयाभिः प्रच्छादयेत् ।

१५. पञ्चदशभागीयाभिस्संख्यां पूरयेत् ।

१६. व्यत्यासं चिनुयाद्यावतः प्रस्ताराँश्चिकीर्षेत् ।

१७. पञ्चचितयो भवन्ति ।

१८. पञ्चभिः पुरीषैरभ्यूहतीति पुरीषान्ता चितिः ।

१९. अर्थान्तरत्वात्पुरीषस्य ।

२०. जानुदघ्नीं साहस्रं चिन्वीत प्रथमं चिन्वानः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२१. नाभिदघ्नीं द्विषाहस्रं द्वितीयम् ।

२२. आस्यदघ्नीं त्रिषाहस्रं तृतीयम् ।

२३. उत्तरमुत्तरं ज्यायाꣳसम् ।

२४. महान्तं बृहन्तमपरिमितं स्वर्गकामश्चिन्वीतेति विज्ञायते ।

२५. द्विषाहस्रे द्विप्रस्ताराश्चितयो भवन्ति ।

२६. त्रिषाहस्रे त्रिप्रस्ताराः ।

२७. चतुर्थ प्रभृतिष्वाहारेषु नित्यमिष्टकापरिमाणम् ।

२८. विज्ञायते च 'न ज्यायाꣳसं चित्वा कनीयाꣳसं चिन्वीते' ति ।

(२३२+२८=२६०)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थ पटलः

एकादशः खण्डः

१. चतुरस्राभिरग्निं चिनुत इति विज्ञायते ।

२. समचतुरस्राः ।

३. अनुपपदत्वाच्छब्दस्य ।

४. पादमात्र्यो भवन्त्यरत्निमात्र्यो भवन्त्यूर्वस्थिमात्र्यो भवन्त्यणूकमात्र्यो भवन्तीति विज्ञायते ।

५. चतुर्भागीयमणकम् ।

६. पञ्चमभागीयारत्निः ।

७. तथोर्वस्थि ।

८. पादेष्टका पादमात्री ।

९. तत्र यथाकामी शब्दार्थस्य विशयित्वात् ।

१०. उपधानेऽष्टावष्टौ पादेष्टकाश्चतुर्भागीयानां पक्षाग्रयोर्निदध्यात् ।

११. सन्ध्योश्च तद्वदात्मानं षडङ्गुलावेताः ।

१२. श्रोण्यंसेषु चाष्टौ प्राचीः प्रतीचीश्च ।

१३. सन्ध्यन्तराले पञ्चमभागीयास्सपादाः ।

१४. पुच्छे प्रादेशमुपधाय सर्वमग्निं चतुर्भागीयाभिः प्रच्छादयेत् ।

१५. पादेष्टकाभिस्संख्यां पूरयेत् ।

१६. अपरस्मिन्प्रस्तारे पुच्छाप्यये पञ्चमभागीया विशयाः ।

१७. ता आत्मनि चतुर्दशभिः पादैर्यथायोगं उपदध्यात् ।

१८. सर्वमग्निं पञ्चभागीयाभिः प्रच्छादयेत् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१९ पादेष्टकाभिस्संख्यां पूरयेत् ।

२०. व्यत्यासं चिनुयाद्यावतः प्रस्ताराँश्चिचकीर्षेत् ।

२१. एकविधप्रभृतीनां करणीनां द्वादशेन त्रयोदशेनेतीष्टकाः कारयेत् ।

२२. पादेष्टकाश्च ।

२३. व्यत्यासं चिनुयाद्यावतः प्रस्ताराँश्चिचकीर्षेत् ।

२४. एकविधप्रभृतीनां प्रथमाहारेण द्वितीयेन तृतीयेनेति योयुज्येत सर्वेषाँ यथाश्रुतिसंख्या तथोर्ध्वप्रमाणम् ।

(२६० + २४ = २८४)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वादशः खण्डः

१. काम्यागुणविकाराः गुणशास्त्रत्वात् ।

२. प्रउगं चिन्वीत भ्रातृव्यवानिति विज्ञायते ।

३. यावानग्निस्सारत्निप्रादेशो द्विस्तावतीं भूमिं चतुरस्रां कृत्वा पूर्वस्याः करण्या अर्धाच्छ्रोणीं प्रत्यालिखेत् ।

४. सा नित्या प्रउगम् ।

५. करणानि चयनमित्येकविधोक्तम् ।

६. प्रउगा इष्टकाः कारयेत् ।

७. उभयतः प्रउगं चिन्वीत यः कामयेत प्रजातान् भ्रातृव्यान्नुदेय प्रतिजनिष्यमाणानिति विज्ञायते ।

८. यथा विमुखे शकटे ।

९. तावदेव दीर्घं चतुरस्रꣳ विहृत्य पूर्वापरयोः करण्योरर्धात्तावति दक्षिणोत्तरयोर्निपातयेत् ।

१०. नित्योभयतः प्रउगम् ।

११. प्रउग चितोक्तीः (क्तम्) ।

१२. उभयतः प्रउगा इष्टकाः कारयेत् । (२८४ + १२ = २९६)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रयोदशः खण्डः

१. रथचक्रचितं चिन्वीत भ्रातृव्यवानिति विज्ञायते ।

२. यावानग्निस्सारत्निप्रादेशस्तावतीं भूमिं परिमण्डलां कृत्वा तस्मिश्चतुरमवदध्याद्यावत्सम्भवेत् ।

३. तस्या करण्या द्वादशेनेष्टकाः कारयेत् ।

४. तासां षट् प्रधा उपधाय शेषमष्टधा विभजेत् ।

५. उपधाने चतुरस्रस्यावान्तरदेशान् प्रति स्रक्तीस्सम्पादयेत् ।

६. मध्यानीतरस्मिन् प्रस्तारे ।

७. व्यत्यासं चिनुयात् यावतः प्रस्तरांश्चिकीर्षेत् ।

८. द्रोणाचितं चिन्वीतान्नकाम इति विज्ञायते ।

९. द्वयानि तु खलु द्रोणानि चतुरस्राणि परिमण्डलानि च ।

१०. तत्र यथाकामी शब्दार्थस्य विशयित्वात् ।

११. चतुरस्रं वा यस्य गुणशास्त्रम् ।

१२. स चतुरस्रः ।

१३. पश्चात् त्सरुर्भवत्यनुरूपत्वायेति विज्ञायते ।

१४. सर्वस्या भूमेर्दशमं त्सरु ।

१५. तस्य पुच्छेन निर्हार उक्तः ।

१६. तस्या करण्या द्वादशेनेष्टकाः कारयेत् ।

१७. अध्यर्धाः पादेष्टकाश्च ।

१८. उपधानेऽध्यर्धाः पुरस्तात्प्रतीचीरात्मन्युपदधाति ।

१९. त्सर्वग्रे श्रोण्योश्च प्राचीः ।

२०. सर्वमग्निं चतुरस्राभिः प्रच्छादयेत् ।

२१. पादेष्टकाभिस्संख्यां पूरयेत् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२२. अपरस्मिन्प्रस्तारेऽध्यर्धा दक्षिणतः उदीचीरात्मन्युपदधात्युत्तरतश्च दक्षिणाः ।

२३. त्सरुपार्श्वयोर्दक्षिणा उदीचीश्च ।

२४. सर्वमग्निं चतुरस्राभिः प्रच्छादयेत् ।

२५. पादेष्टकाभिस्संख्यां पूरयेत् ।

२६. व्यत्यासं चिनुयात् यावतः प्रस्तारांश्चिकीर्षेत् ।

(२९६+२६=३२२)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्दशः खण्डः

१. समूह्य चिन्वीत पशुकाम इति विज्ञायते ।
२. समूहन्नेवेष्टका उपदधाति ।
३. दिक्षु चत्वाला भवन्ति ।
४. तेभ्यः पुरीषमभ्युद्दूहतीति विज्ञायते ।
५. परिचाय्यं चिन्वीत ग्रामकाम इति विज्ञायते ।
६. मध्यमां स्वयमातृण्णां प्रदक्षिणमिष्टकागणैः परिचिनोति ।
७. स परिचाय्यः ।
८. उपचाय्यं चिन्वीत ग्रामकाम इति विज्ञायते ।
९. परिचाय्येनोक्तः ।
१०. श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति विज्ञायते ।
११. द्वयानि खलु श्मशानानि चतुरस्राणि परिमण्डलानि च ।
१२. तत्र यथाकामी शब्दार्थस्य विशयित्वात् ।
१३. चतुरस्रं वा यस्य गुणशास्त्रम् ।
१४. स चतुरस्रः ।
१५. त्सरुवर्जं द्रोणचितोक्तः ।
१६. छन्दश्चितं चिन्वीत पशुकाम इति विज्ञायते ।
१७. सर्वैश्छन्दोभिश्चिनुयादित्येकम् ।
१८. प्राकृतैरित्यपरम् । (३२२ + १८ = ३४०)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चमः पटलः

पञ्चदशः खण्डः

१. श्येनचितं चिन्वीत सुवर्गकाम इति विज्ञायते ।

२. वक्रपक्षो व्यस्तपुच्छो भवति ।

३. पश्चात् प्राङ्डूहति ।

४. पुरस्तात् प्रत्यङ्ङुदूहति ।

५. एवमिव हि वयसां मध्ये पक्षनिर्णामो भवतीति विज्ञायते ।

६. यावानग्निस्सारत्निप्रादेशस्सप्तविधस्संपद्यते ।

७. प्रादेशं चतुर्थमात्मनश्चतुर्भागीयाश्चाष्टौ, तासां तिस्रश्शिरः ।

८. इतरत्पक्षयोर्विभजेत् ।

९. पञ्चारत्निः पुरुषः ।

१०. चतुररत्निः व्यायामः ।

११. चतुर्विंशत्यङ्गुलयोऽरत्निः ।

१२. तदर्धं प्रादेश इति क्लृप्तिः ।

१३. अर्धदशमा अरत्नयोऽङ्गुलयश्च चतुर्भागोनाः पक्षायामः ।

१४. द्विपुरुषां रज्जुमुभयतः पाशां करोति ।

१५. मध्ये लक्षणम् ।

१६. पक्षस्यापरयोः कोट्योरन्तौ नियम्य लक्षणेन प्राचीनमायच्छेदेवं पुरस्तात् ।

१७. स निर्णामः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१८. एतेनोत्तरः पक्षो व्याख्यातः ।

१९. आत्मा द्विपुरुषायामोध्यर्धपुरुषव्यासः ।

२०. पुच्छेऽर्धपुरुषव्यासं पुरुषं प्रतीचीनमायच्छेत् ।

२१. तस्य दक्षिणतोऽन्यमुत्तरतश्च ।

२२. तावक्ष्णया व्यवलिखेत् ।

२३. यथाऽर्धपुरुषोऽप्यये स्यात् ।

२४. शिरस्यर्धपुरुषेण चतुरस्रं कृत्वा पूर्वस्याः करण्या अर्धात्तावति दक्षिणयोर्निपातयेत् । (३४० + २४ = ३६८)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षोडशः खण्डः

१. अप्ययान् प्रति श्रोण्यंसानपच्छिन्द्यात् ।
२. एवमिव हि श्येनः ।
३. करणं पुरुषस्य पञ्चमायामं षष्ठव्य सं कारयेत् ।
४. यथायोगनतम् ।
५. तत्प्रथमम् ।
६. ते द्वे प्राची संहिते ।
७. तद् द्वितीयम् ।
८. प्रथमस्य षड्भागमष्ट भागेन वर्धयेत् ।
९. यथायोगनतम् ।
१०. तत् तृतीयम् ।
११. चतुर्भागीयाऽध्यर्धा ।
१२. तस्याश्चतुर्भागीयामात्रमक्षणया छिन्द्यात् ।
१३. तच्चतुर्थम् ।
१४. चतुर्भागीयार्धं पञ्चमम् ।
१५. तस्याक्ष्णया भेदष्षष्ठम् ।
१६. पुरुषस्य पञ्चमभागं दशभागव्यासं प्रतीचीनमायच्छेत् ।
१७. तस्य दक्षिणतोऽन्यमुत्तरतश्च ।
१८. तावक्ष्णया दक्षिणावरयोः कोटचोरालिखेत् ।
१९. तत्सप्तमम् ।
२०. एवमन्यत् ।
२१. उत्तरं तूत्तरस्याः कोटचा लिखेत् ।
२२. तदष्टमम् ।
२३. चतुर्भागीयाक्षणयोभयतो भेदो नवमम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२४. उपधाने षष्टिषष्टि: पक्षयो: प्रथमा उदीचोर्नि(रुप)दध्यात् ।

२५. पुच्छपार्श्वयोरष्टावष्टौ ।

२६. तिस्रोऽग्रे तत एकान्ततस्तिस्र: षष्ठ्या: ।

२७. तिस्रोऽग्रे तत एकान्ततस्तिस्र: तत एका ।

२८. पुच्छाप्यये चतुर्थ्यौ विशये ।

२९. तयोस्तु पश्चात्पञ्चम्यावनीकसंहिते । (३६४ + २९ = ३९३)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सप्तदशः खण्डः

१. शेषे दश चतुर्थ्यः ।
२. श्रोण्यंसेषु चाष्टौ ।
३. प्राचीः प्रतीचीश्च ।
४. शेषे च षड्विंशतिरष्टौ षष्ठ्यश्चतस्रः पञ्चम्यः ।
५. शिरसि चतुर्थ्यौ विशये ।
६. तयोश्च पुरस्तात्प्राच्यौ ।
७. एष द्विशतः प्रस्तारः ।
८. अपरस्मिन्प्रस्तारे पञ्च पञ्च निर्णामयोर्द्वितीयाः ।
९. अप्यययोश्च तृतीयाः ।
१०. आत्मानमष्टभागावेताः ।
११. शेषे पञ्चचत्वारिंशत्प्रथमाः प्राचीः ।
१२. पुच्छपार्श्वयोः पञ्च पञ्च सप्तम्यः ।
१३ द्वितीयचतुर्थ्योश्चान्यतरतः प्रतिसंहितामेकैकाम् ।
१४. शेषे त्रयोदशाष्टम्यः ।
१५. श्रोण्यंसेषु चाष्टौ चतुर्थ्यो दक्षिणा उदीचीश्च ।
१६. शेषे च विंशतिः ।
१७. त्रिंशत् षष्ठ्यः एकां पञ्चमीम् ।
१८. शिरसि चतुर्थ्यौ ।
१९. तयोश्च पुरस्ताच्चतस्रो नवम्यः ।
२०. एष द्विशतः प्रस्तारः ।
२१. व्यत्यासं चिनुयाद्यावतः प्रस्तारांश्चिचकीर्षेत् ।

(३९३ + २१ = ४१४)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षष्ठः पटलः

अष्टादशः खण्डः

१. श्येनचितं चिन्वीत सुवर्गकाम इति विज्ञायते ।

२. वक्रपक्षो व्यस्तपुच्छो भवति ।

३. पश्चात् प्राङ्उदूहति ।

४. पुरस्तात् प्रत्यङ्उदूहति ।

५. एवमिव हि वयसां मध्ये पक्षनिर्णामो भवतीति विज्ञायते ।

६. पुरुषस्य षोडशभिर्विंशꣳ शतꣳ सारत्निप्रादेशस्सप्तविधस्संपद्यते ।

७. तासां चत्वारिꣳशदात्मनि ।

८. तिस्रश्शिरसि ।

९. पञ्चदश पुच्छे ।

१०. एकत्रिꣳशद् दक्षिणे पक्षे ।

११. तथोत्तरे ।

१२. अध्यर्धपुरुषस्तिर्यग्द्वावायामत इति दीर्घं चतुरस्रं विहृत्य श्रोण्यꣳसेभ्यो द्वे द्वे षोडश्यौ निरस्येत् ।

१३. चत्वारिꣳशत्परिशिष्यन्ते ।

१४. स आत्मा ।

१५. शिरस्यर्धपुरुषेण चतुरस्रं कृत्वा पूर्वस्याः करण्या अर्धात्तावति दक्षिणोत्तरयोर्निपातयेत् ।

१६. तिस्रः परिशिष्यन्ते ।

१७. तच्छिरः ।

१८. पुरुषस्तिर्यग्द्वावायामतः ।

१९. षोडशभागश्च दक्षिणः पक्षः ।

२०. तथोत्तरः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२१. पक्षाग्रे पुरुषचतुर्थेन चत्वारि चतुरस्राणि कृत्वा तान्यक्ष्णया व्यवलिख्यार्धानि निरस्येत् ।

२२. एकत्रिंशत् परिशिष्यन्ते ।

२३. पक्षाग्रमुत्सृज्य मध्ये पक्षस्य प्राचीं लेखामालिखेत् ।

२४. पक्षाप्यये पुरुषं नियम्य (लेखायां) पुरुषान्ते नितोदं कुर्यात् ।

२५. नितोदात्प्राचीनं पुरुषान्ते नितोदम् ।

२६. नितोदयोर्ना (गा) नान्तावालिखेत् ।

२७. तत्पक्षनमनम् ।

२८. एतेनोत्तरः पक्षो व्याख्यातः ।

२९. द्विपुरुषं पश्चादर्धपुरुषं पुरस्ताच्चतुर्भागोनः पुरुष आयामः ।

३०. अष्टादश करण्यौ ।

३१ पार्श्वयोस्ताः पञ्चदश परिगृह्णन्ति ।

३२. तत्पुच्छम् । (४१४ + ३२ = ४४६)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकोनविंशः खण्डः

१. षोडशीं चतुर्भिः परिगृह्णीयात् ।

२. अष्टमेन त्रिभिरष्टमैश्चतुर्थेन चतुर्थसविशेषेणेति ।

३. अर्धेष्टकां त्रिभिर्द्वाभ्यां चतुर्थाभ्यां चतुर्थसविशेषेणेति ।

४. पादेष्टकां त्रिभिश्चतुर्थेनैकं चतुर्थसविशेषार्धाभ्यां चेति ।

५. पक्षेष्टका चतुर्भिर्द्वाभ्यां चतुर्थाभ्यां सप्तमाभ्यां चेति ।

६. पक्षमध्यीयां चतुर्भिर्द्वाभ्यां चतुर्थाभ्यां द्विसप्तमाभ्यां चेति ।

७. पक्षाग्रीयां त्रिभिश्चतुर्थेनैकं चतुर्थसप्तमाभ्यामेकं चतुर्थसविशेष सप्तमाभ्यां चेति ।

८. पक्षकरण्यास्सप्तमं तिर्यङ्मानी, पुरुषचतुर्थं पार्श्वमानी ।

९. तस्याक्ष्णया रज्ज्वा करणं प्रजम्भयेत् ।

१०. पक्षनमन्यास्सप्तमेन फलकानि नमयेत् ।

११. उपधाने चतस्रः पादेष्टकाः पुरस्ताच्छिरसि ।

१२. अपरेण शिरसोऽप्ययं पञ्च ।

१३. पूर्वेण पक्षाप्ययावेकादश ।

१४. अपरेणैकादश ।

१५. पूर्वेण पुच्छाप्ययं पञ्च ।

१६. अपरेण पञ्च ।

१७. पञ्चदश पुच्छाग्रे । (४४६ + १७ = ४६३)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विंशः खण्डः

१. चतस्रश्चतस्रः पक्षाग्रीयाः पक्षाग्रयोः ।

२. पक्षाप्ययोश्च विशयाः ।

३. ता आत्मनि चतसृभिश्चतसृभिष्षोडशीभिर्यथायोगं पर्युपदध्यात् ।

४. चतस्रश्चतस्रः पक्षमध्यीयाः पक्षमध्ययोः ।

५. पक्षेष्टकाभिः प्राचीभिः पक्षौ प्रच्छादयेत् ।

६. अवशिष्टं षोडशीभिः प्रच्छादयेत् ।

७. अन्त्या बाह्यविशेषा अन्यत्र शिरसः ।

८. अपरस्मिन्प्रस्तारे पुरस्ताच्छिरसि द्वे षोडश्यौ बाह्यविशेषे उपदध्यात् ।

९. तेऽपरेण द्वे विशये अभ्यन्तरविशेषे ।

१०. द्वाभ्यामर्धेष्टकाभ्यां यथायोगं पर्युपदध्यात् ।

११. बाह्यविशेषाभ्यां परिगृह्णीयात् ।

१२. आत्मनः करणीनां सन्धिषु षोडश्यो बाह्यविशेषा उपदध्यात् ।

१३. चतस्रश्चतस्रोऽर्धेष्टकाः पक्षाग्रयोः ।

१४. पक्षेष्टकाभिरुदीचीभिः पक्षौ प्रच्छादयेत् ।

१५. तिस्रस्तिस्रोऽर्धेष्टकाः पुच्छपार्श्वयोः ।

१६. अवशिष्टं षोडशीभिः प्रच्छादयेत् ।

१७. अन्त्या बाह्यविशेषा अन्यत्र पुच्छात् ।

१८. यच्चतुरस्रं त्र्य (श्रि) स्रं वा सम्पद्येतार्धेष्टकाभिः पादेष्टकाभिर्वा प्रच्छादयेत् ।

१९. अणूकाः पञ्चदशभागीयानां स्थाने ।

२०. व्यत्यासं चिनुयाद्यावतः प्रस्तारांश्चिकीर्षेत् ।

(४६३ + २० = ४८३)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकविंशः खण्डः

१. कङ्कचिदलजचिदिति श्येनचिता व्याख्यातौ ।

२. एवमिव हि श्येनस्य वर्षीयाᳬसौ पक्षौ पुच्छाद्वक्रौ सन्नतं पुच्छं दीर्घ आत्माऽमण्डलं शिरश्च ।

३. तस्माच्छ्रुतिसामर्थ्यात् ।

४. अशिरस्को वाऽनाम्नानात् ।

५. ज्ञायते च "कङ्कचितं शीर्षण्वन्तं चिन्वीत यः कामयेत स शीर्षोऽयुष्मिन् लोके सम्भवेयमिति" विद्यमाने कथं ब्रूयात् ।

६. प्राकृतौ वक्रौ पक्षौ सन्नतं पुच्छं विकारश्रवणात् ।

७. यथा प्रकृत्यात्माऽविकारात् ।

८. अथो एतच्छ्येनचितं चिन्वीतेति ।

९. यावदाम्ना (तं) न सारूप्यं तद् व्याख्यातम् ।

१०. त्रिस्तावोऽग्निर्भवतीत्यश्वमेधे विज्ञायते ।

११. तत्र सर्वाभ्यासोऽविशेषात् ।

१२. दीर्घचतुरस्राणां समासेन पक्षपुच्छानां समास उक्तः ।

१३. एकविᳬशोऽग्निर्भवतीत्यश्वमेधे विज्ञायते ।

१४. तत्र पुरुषाभ्यासो नारत्निप्रादेशानाम् ।

१५. संख्या संयोगात् संख्या संयोगात् । (४८३ + १५ = ४९८)

॥ समाप्तः आपस्तम्बीय शुल्बप्रश्नः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आपस्तम्बीय शुल्ब-परिशिष्टाः

Verses Quoted in the Commentaries on the Apastamba Sulba Sutra

(Khanda and Sutra)

१. विहारयोगान्व्याख्यास्यामः (I. 1)

ओमित्येकाक्षराख्येयं वन्दे वाङ्मनसातिगम् ।
पश्यन्ति कवयो यद्धि तद्विष्णोः परमं पदम् ।।

लक्ष्मीसहायमतसीकुसुमच्छवि शाश्वतम् ।
ज्योतिर्मे हृदये भूयात्सदा राजीवलोचनम् ।।

आपस्तम्बाय मुनये नमो वेदार्थभूमये ।
यत्सूत्रसक्तास्तिष्ठन्ते यज्ञश्रुतिकुमारिकाः ।।

तत्सूत्रशुल्बव्याख्येयमक्षरार्थावबोधिनी ।
करविन्दाधिपेनाद्य क्रियते भाष्यकृन्मते ।।

(Karavinda)

इष्टमण्डलमध्यस्थ शङ्कुच्छायाग्रवृत्तयोः ।
योगाभ्यां कृतमत्स्येन ज्ञेये याम्योत्तरे दिशौ ।।

(तथा ज्योतिर्ज्ञाने—Kara.)

आपस्तम्बेन योऽयं व्यिरचि भगवता शुल्बसंज्ञो गभीरः ।
प्रश्नोऽर्थं तस्य भाष्यप्रभृतिषु कथितं विस्तृतं वीक्ष्य कृत्स्नम् ।।
संक्षिप्योद्बोधनार्थं कुशिककुलनिधेर्भाधवार्यस्य यष्टुः ।
पुत्रश्शुल्बप्रदीपं विवरणमधुना सुन्दरो निर्मिमीते ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२. आयामं वाभ्यस्यागन्तुचतुर्थमायामस्याक्ष्णया रज्जुस्तिर्यङ्मानीशेषः ॥ (I. 7)

व्याख्यातविहरणम् (I. 8)

आगन्त्वर्धेन चिह्नं यद्भागानत्र[1] करोति च ।
ध्रुवं स यावदागन्तुं कृत्वैकोने निरञ्जनम् ॥
(Kapardi)

भागास्साभ्यासमानस्य यावन्तोऽभ्याससम्मिताः ।
द्विस्तावन्तस्स्युरागन्तौ तदेकोनेऽत्र लक्षणम् ॥ (१)
ते चेत् सांभ्यासमानस्य सांशास्स्युस्सांशसंख्यया ।
छिन्द्याद्द्विगुणयाऽऽगन्तुं भागोनेऽत्रैव[2] लक्षणम् ॥ (२)
ऊनेऽधिके वा त्वागन्तौ[3] कथं साभ्यासमानके ।
भागानां परिक्लिप्तिस्स्यात् कथं वा स्यान्निरञ्जनम् ॥ (३)
समता न्यूनताधिक्येऽप्यागन्तौ[4] स्यात्सदैकता ।
तद्वशेन प्रमाणे स्युर्भागैक्यानेकतांशता[5] ॥ (४)
आगन्तावधिके मानं केवलांशो[6] भवेत्सदा ।
न्यूने भागैक्यनानात्वे स्यातां सांशे च केवले ॥ (५)
त्रिपादोने तु सांशत्वमर्धोने स्यान्निरञ्जनम्[7] ।
समे भागैक्यमेव स्यादित्येव[8] भागकल्पना ॥ (६)

---

1. आगन्त्वर्धेन चिह्नाय भागोनात्र ।
2. अत्रापि ।
3. प्यागन्तौ ।
4. याऽऽगन्तौ ।
5. स्युर्भागैक्यानेदेकतांगता ।
6. केवलं यो ।
7. निरंशता ।
8. स्यादितीयम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सांशेंऽशसदृशच्छेदं कृत्वा साभ्यासमानकम् ।
तच्छेदसङ्ख्याद्विगुणच्छेदमागन्तुमप्यथ ।। (७)

यावद्भिरंशैरूनेऽत्र भागेनैकेन हीयते ।
तावद्भिरंशैरूने स्यादागन्तौ लक्षणक्रिया ।। (८)

यावतां पूरणेऽभ्यासो येन भागेन हीयते ।
लक्षणार्थं स भागस्तद्द्विस्तावद्भागपूरणम् ।। (९)

तृतीयग्रहणं कुर्वन् षड्भागसहितं मुनिः ।
साभ्यासमानगान् भागान् द्विकाभ्यासेऽत्र मन्यते ।। (१०)

साभ्यासस्य प्रमाणस्य त्रधाकण पूर्वकम् ।
अभ्यासस्य तृतीयत्वमुक्त्वा षड्भागिनं मतम् ।। (११)

अङ्गीकृत्य तु तत्रैकभागोने लक्षणं व्यधात् ।
यदयं तेन साभ्यासमानभागस्थसङ्ख्यया ।। (१२)

भिन्द्याद्द्विगुणयाऽऽगन्तुं भागोने स्यान्निरञ्जनम् ।
अनन्तरं त्रिसङ्ख्यायां षट्सङ्ख्यां वदताऽमुना ।। (१३)

साभ्यासमानभागीया सङ्ख्याऽऽगन्तौ द्विरिष्यते ।
तृतीयषड्भागोक्ते द्वे यतस्साभ्यासगोचरे ।। (१४)

साभ्यासमानादभ्यासं द्विगुणच्छेदमाहतुः ।
यद्वैकसंख्यासंयुक्तमूनभागस्थ संख्यया ।। (१५)

द्विगुणीकृतया या स्यादागन्तौ भागकल्पना ।
यद्वऽभ्यासार्धसदृशभागं साभ्यासमानकम् ।। (१६)

कृत्वा तत्संख्ययाऽऽगन्तुं छित्त्वैकोनेऽत्र लक्षणम् ।
तृतीयशब्दसामर्थ्यादियं न्याय उदीर्यते ।।(१७)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चदशिकाष्टिकयोरित्यादेरुक्तिरेव च ।
पञ्चदशिकाष्टिकयोरिति यत्साम्यमानकम् ।। (१८)

यद्द्वादशिक-पञ्चत्रिंशकयोरिति वा परम् ।
त्रिगुणागन्तुतत्पूर्वत्र्यंशाभ्यामथवान्वितम्[1] ।। (१९)

परयुक्तं पञ्चमाभ्यां यद्वा पञ्चगुणान्वितम् ।
एते विहरणार्थायायामाभ्यासस्य गोचरे ।। (२०)

यतस्ते न भवेतां ते अभ्यासन्यायहेतुके ।
अर्धाभ्यासे तथाऽऽयामाभ्यासाय तु परस्परम् ।। (२१)

सापेक्षाङ्गविधिस्तद्वन्न्यायस्यास्य निबन्धनम् ।
नानाभूतेऽपि वाऽऽगन्तौ तद्भागे च तथाविधे ।। (२२)

निरञ्जनं विधिः कस्माद्भागेनैकेन वर्जिते ।
अर्धाभ्यासे तु भागोने लक्षणं यत्तृतीयके[2] ।। (२३)

तद्दरीकृत्य चायामाभ्यासे तत्फलभागिनः ।
तिर्यङ्मान्यक्षणयारज्जुविवेकरचैक भागकम् ।। (२४)

आश्रित्य निर्णयं ब्रूते तेनैकोनेऽत्र लक्षणम् ।

(Karavinda)

इष्टायां पृष्ठचायारिष्टामागन्तुरज्जुमभ्यस्येत् ।
अभ्यासार्धसमाना यावन्तोंऽशास्सहाधिकायामे[3] ।। (१)

---

1. भ्यासमथान्वितम्
2. यद् विधीयते
3. इष्टायां समपृष्ठ्यायामागन्तुं रज्जुमभ्यसेत् ।
अभ्यासार्धसमानाया यावन्तोंऽशास्सहाधिकाः ।। (१)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभ्यास तावद्धा संभुज्यैकोनितेऽत्र चिह्नं स्यात् ।
एकोंऽशस्सायामः कर्णस्तिर्यङ्क्त शेषस्स्यात् ॥ (२)

(Sundararaja)

३. **तृतीयकरण्येतेन व्याख्याता ।** (II. 8)
विभागस्तु नवधा । (II. 9)

अक्ष्णारज्जुस्त्रिकृत्प्रोक्ता प्रमाणसविशेषयोः ।
अस्या एव तृतीयं तु तृतीयकरणीं विदुः ॥

४. **समचतुरस्रं दीर्घचतुरस्रं चिकीर्षन् यावच्चिकीर्षेत् तावतीं पार्श्वमानीं कृत्वा यदधिकं स्याद् यथायोगमुपदध्यात् ।** (III. 1)

चतुरस्रं समं द्वैधं कृत्वा भागान्तरोपरि ।
क्षिप्ते भागान्तरे दीर्घचतुरस्रं तु तद्भवेत् ॥

करिष्यमाणदीर्घस्य विस्तारसमपार्श्वकम् ।
विभज्य शेषमधिकं यथायोग हि तत्क्रिया ॥

तावती पार्श्वमान्याश्च शेषस्याञ्जस्यभागतः ।
करिष्यमाणदीर्घस्य तिर्यग्यावच्चिकीर्षितम् ॥

(Karavinda)

५. **मण्डलं चतुरस्रं चिकीर्षन् विष्कम्भं पञ्चदशभागान् कृत्वा द्वावुद्धरेत् ।** (III. 6)

त्रयोदशावशिष्यन्ते । (III. 7)

सानित्या चतुरस्रम् । (III. 8)

---

1. अभ्यासं तं चतुर्धा संभुज्यैकोनिते चिह्नं कुर्यात् ।
सैकांशस्त्वायामः कर्णस्तिर्यक् त्रिरंश आयामः ॥ (२)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(त्रीणि शतानि चतुस्सप्ततिश्चाङ्गुलयो विष्कम्भो भवति। तस्य परिणाहस्सहस्रं पञ्चसप्तति शताङ्गुलयः। यथाऽऽहु :—)

चतुरधिकं शतमष्टगुणं द्वाषष्टिस्तथा सहस्राणाम्।
अयुतद्वयविष्कम्भस्यासन्नो वृत्तपरिणाहः॥

इति। अस्य मण्डलस्य फलं लक्षं नवसहस्रमष्टौ शतानि षष्टिश्चाङ्गुलयो दृश्यन्ते उक्तं च (१)

समपरिणाहस्यार्ध विष्कम्भार्धहतमेव[1] वृत्तफलम्।

(Sundararaja)

चतुरस्रमण्डलकृतौ त्यक्तव्योऽष्टादश शतांशः।
सूत्रोक्ताद्व्यासार्धाद्व्यासार्ध मण्डलस्यैतत्॥ (१)

चतुरस्रव्यासे वा त्रिशशतांश समभ्यस्य।
पुनरष्टमं च युञ्ज्याद्विष्कम्भो मण्डलस्यैषः॥ (२)

मण्डलचतुरस्रकृतौ विष्कम्भे सूत्रचोदिते युञ्ज्यात्।
त्रिगुणात्स्वकात् त्रयस्त्रिंशत् सातिशयान्मण्डलस्यैतत्॥ (३)

मण्डलविष्कम्भाद्द्वात्रिशतांशक परित्यज्य।
शिष्टान्नवमं जह्याच्चतुरस्रस्यैष विष्कम्भः॥ (४)

एवं कृते हि वह्नावेकशतविधेऽपि वृत्तविष्कम्भे।
स तिलद्वितयविशेषो न च भवति परस्परविरोधः॥ (५)

(Sundararaja)

1. विष्कम्भार्धवर्गितमेव।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

६. गार्हपत्याहवनीययोन्तरालं पञ्चधा षड्धा वा सꣳविभज्य षष्ठꣳ सप्तमꣳ वा भागं आगन्तुमुपसमस्य सम त्रध विभज्यापरस्मिꣳस्तृतीये लक्षणं कृत्वा गार्हपत्याहवनीययोरन्तौ नियम्य लक्षणेन ।
दक्षिणापाथम्य निमित्तं करोति (**IV. 7**)
तद्दक्षिणाग्नेरायतनम् (IV. 8)
श्रुतिसामर्थ्यात् । (IV. 9)

दक्षिणाग्नेर्हृताच्छङ्कोरुदक्छङ्कुर्दशाङ्गुले ।
एकादशतिलैरूने कार्यस्य धनुषा समः ॥

तस्मिन्पाशं प्रतिमुच्य विंशत्यायतया लिखेत् ।
ऊनया तु द्वाविंशतितिलैरर्धं त्यजेदुदक् ॥
(Kapardi)

७. प्रादेशमुखाः प्रादेशान्तराला भवन्तीत्युपरवाणां विज्ञायते । (VII. 5)
अरत्निमात्रं चतुरस्रं विहृत्य स्रक्तिषु शङ्कून् निहत्यार्धप्रादेशेन तं तं परिलिखेत् । (VII. 6)
श्रुतिसामर्थ्यात् । (VII. 7)

मीयते सौमिकी वेदिः प्रक्रमैर्द्विदशाङ्गुलैः ।
आदौ त्रिषु नव द्व्येकेचन्द्रद्विशरभूद्विषु ॥ (१)

एकैकद्विशरैकेषु शङ्कवो दश पञ्च च ।
षट्त्रिंशिका मानरज्जुः तस्या द्व्यष्टसु लक्षणम् ॥ (२)

विमाने पाशयोर्मध्ये प्रक्रमा द्वादश स्मृताः ।
श्रोणी पञ्चदशस्वाद्ये सदोऽनन्तरतुर्ययोः ॥ (३)

तत्कोणः[1] पञ्चमोनेषु भास्करेषु दशस्वपि ।
तृतीये द्व्यन्तरा धिष्ण्यास्तेषां प्रादेशतो भ्रमः ॥ (४)

1. तत्कोणाः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रुद्रेषु सप्तदशसु शङ्कू पादोनितेष्विह ।
आग्नीध्रं तत्पञ्चमे[1] तु धिष्ण्यौ द्वादशुसु स्मृतौ ।। (५)
षष्ठे स्यात्पञ्चके[2] धानं पञ्चाशद् द्वितयान्विते ।
सप्तमे प्राग्वदाग्नीध्रं नवमे मनुषूत्करः ।। (६)
एकादशे हविर्धानं पाशौ व्यत्यस्य पूर्ववत् ।
षोडशस्वर्धहीनेषु शामित्रो द्वादशे भवेत् ।। (७)
[3]उत्तरार्धात् तृतीये तु[4] त्रयोदशचतुर्दशे ।
शङ्कोरुत्तरवेदिस्स्याद्द्वयोस्सार्धमुपान्त्ययोः ।। (८)
अन्तिमे द्वादशस्वंसौ चात्वालोऽसादुदक् क्रमे ।
पुरः पश्चात्सदोधानात्त्यजेत्प्रक्रमपञ्चकम्[5] ।। (९)
दक्षिणे तु हविर्धाने पश्चात् त्रीन् प्रक्रमांस्त्यजेत् ।
पार्श्वद्वये प्रक्रमौ द्वौ अङ्गुलद्वय संयुतौ (१०)
अरत्निमात्र मध्ये चोपरवाणां तु लक्षणम् ।
एवमेव विमानं स्यात् पदैरपि चतुर्विधैः ।। (११)
पदं पञ्चमसंयुक्तं धिष्ण्य विष्कम्भ इष्यते ।
शम्यामात्रस्तु चात्वालो[6] व्यक्तं बोधायनोऽब्रवीत् ।
अन्यथाऽग्नौ विरोधस्स्यात् मानं चान्यन्न विद्यते ।। (१२)

(Karavinda)

---

1. आग्नीध्रमार्जालीयौ ।
2. स्यात्पञ्चमे ।
3. षष्ठे शंखौ हविर्धानं पञ्चके सद्विपञ्चमे ।
4. उत्तरार्धतृतीये तु ।
5. पञ्चमम् ।
6. शम्या सर्वत्र चात्वालो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

८. मृदो देहान्कृत्वा (VII. 24)

आग्नीध्रीयं नवधा व्यवलिख्य एकस्यास्स्थानेऽश्मानमुपदध्यात्
(VII. 25)

व्यायाममात्रे चित्येऽग्नौ करणं दारवं भवेत् ।
लौहं वा तच्चतुर्भिस्स्यात्[1] फलकाभिस्तदुच्यते ।। (१)

द्वात्रिंशदङ्गुलायाममङ्गुल्यस्स्युत् त्रयोदश ।
चतुर्विंशति तिल विस्तारः[2] करणे[3] भवेत् ।। (२)

मण्डलात्मनि तत्र स्यात् करणं च चतुर्विधम् ।
मध्यमेकं[4] पृथौ त्रीणि तान्युच्यन्ते यथाक्रमम् ।। (३)

सपञ्चविंशतितिला अङ्गुल्यः पञ्चविंशतिः ।
सर्वतः करणं त्वेकं मध्येऽने (ते) नेष्टकाकृतिः ।। (४)

प्रधिषु त्रीणि तानि स्युः प्रध्यन्ते करणं[5] त्रिभिः ।
फलकैः प्रति (धि) मध्यीयं चतुर्भिः करणं भवेत् ।। (५)

पृष्ठं पञ्च तिलोपेता अङ्गुल्यः पञ्चविंशतिः ।
पार्श्वे चतुर्दशाङ्गुल्यः तिलसप्तदशान्विताः ।। (६)

सप्रपादोनतिलस्त्रि (त्रिं) शदेकोनत्रिंशदङ्गुलम् ।
मुखं स्यात्प्रधिमध्यीयकरणस्यान्तयोरपि[6] ।। (७)

पृष्ठपार्श्वेषु तत्रेमे मुखं षट्त्रिंशदङ्गुलम् ।
अन्तयोर्यत्र यस्य स्यात्पार्श्वं नान्यस्य तत्र तत् ।। (८)

---

1. सकलैश्च । फलकैस्तदिहो ।
2. विहारः ।
3. करणो ।
4. मध्यएकः ।
5. प्रध्यन्तकरणं ।
6. करणं स्यात्तयोरपि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

करणानां मुखान्यत्र विष्कम्भार्धप्रमाणया ।
आलिख्य तक्षयेद्रज्ज्वा कर्कटेनाथवा लिखेत् ।। (९)

षट् त्रिंशदङ्गुलायामा धिष्णयास्सर्वतस्समाः ।
तत्रतत्र यथासङ्ख्यमुच्यन्ते करणान्यथ ।। (१०)

प्रादेशमेकतो यस्मादन्यतोऽष्टादशाङ्गुलम् ।
मार्जालीयेनेन कृता धिष्णिये षट्स्युरिष्टकाः ।। (११)

प्रादेशस्सर्वतो यस्मादाग्नीध्रीये तु तत्कृतः ।
द्वादशांङ्गुलमेकत्र यस्यान्यत्र नवाङ्गुलम् ।। (१२)

होत्रीये द्वादशोपेता तत्कृता द्वादशेष्टकाः ।
नवाङ्गुलं सर्वतस्स्याद्धोत्रीये[1] तेन षोडश ।। (१३)

तिलपञ्चक संयुक्तास्सप्ताङ्गुलय एकतः ।
नवाङ्गुलं चान्यतस्स्यात्करणं त्वेकविंशतौ (कौ) ।। (१४)

तिलसप्त(पञ्च)क संयुक्ता अङ्गुल्यस्सप्त सर्वतः ।
इदमत्रैकविंशे स्याच्चतुर्विंशेष्युभे इमे ।। (१५)

प्रथमे चैकविंशे स्युः षोडशामन्येन पञ्चकम् ।
चतुर्विंशे द्वितीयेन विंशतिस्त्वन्यदन्यतः ।। (१६)

याः प्रादेशे (श) नुवाङ्गुल्यस्त्वष्टौ तास्तित्र एव च ।
प्रादेशाब्राह्मणाच्छंसिधिष्णिये त्वेकयुग्दश ।। (१७)

प्रादेशाष्षट् पदाध्यधद्वेचे ··· त्यष्टके विधिः ।
पोत्रियादौ यथायोगमुपधानं तु सर्वतः (१८)

एकचित्याधिष्णयानां भेदस्यानवकाशतः ।
वैषम्येणैव सङ्ख्यानां करणानेकताभ (वे) यात् ।। (१९)

---

१. सर्वतोयद्धोत्रीये

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्यवलिख्य यथासङ्ख्यमुपदध्यादिहेष्टकाः ।
यथायोगमिति त्वेवमाचार्यो मण्डलेऽब्रवीत् ।। (२०)

अधिकांशेन कर्णस्य हृते कर्णयुगे भुवा ।
हृते फलेन (फलोने) हीनाया युजो वा यद्भुवो दरम् ।। (२१)

तस्यवर्गेऽस्य करणस्य वर्गात्तु परिशोधिते ।
परिशिष्टस्य मूलं तु लम्बकं तद् विदो विदुः ।। (२२)

वेदि प्राचीमितां रज्जुमन्तरालोक्तया वृता ।
दक्षिणोत्तरमायम्य वेदेः पूर्वापरार्धयोः ।। (२३)

वि (द्वि) तृतीयौ तु विज्ञेया प्रागुद्वेदिरुत्करः (त्तरम्) ।
मध्यदेशोत्तिमध्यं तु वह्नेः प्राच्य प्रतीच्ययोः ।। (२४)

लक्षणेन निमित्तार्थं (द्वि) वितृतीये त्वपायते ।
पश्चिमे चोत्तरत्रापि निमित्तं स्यादपायते ।। (२५)

विपर्यस्य तु पूर्वत्र निमित्ते दक्षिणोत्तरे ।
कृत्वा विष्कम्भ तुर्ये स्यादुभयस्यापि[1] लक्षणम् ।। (२६)

तयोर्लक्षणयोर्लेखां रज्जुं वा प्राङ्निपातयेत् ।
लेखाया दक्षिणं ग्राह्यं मण्डलार्थं त्यजेदुदक् ।। (२७)

परिणाहे चतुर्था षट्संभुग्ने भुग्नलाञ्छने ।[2]
अङ्कादङ्कगता रेखा चतुरस्रस्य साधिका ।। (२८)

विष्कम्भार्धीय वर्गस्य द्विगणस्यैष[3] मूलतः ।
मण्डलेचतुरस्रस्य करणी परिकल्पना (क्लिपता) ।। (२९)

---

1. तुल्यस्यादुभयस्यापि दुत्त रत्रापि दुभयस्यापि ।
2. चतुर्धातु संभुग्ने लांछिते तत ।
3. द्विगुण स्येह ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यद्वा विष्कम्भमूलार्ध (वर्गार्धं) मलेन करणीकृतिः ।
मण्डले चतुरस्रस्य यावत् सम्भवजन्मनः ।। (३०)
अक्षणयावस्थितां रज्जुं यावत् सम्भवजन्मनः ।
चतुरस्रस्य विष्कम्भं मण्डलस्य वदन्ति हि ।। (३१)

विष्कम्भस्यान्तरा वर्गे विष्कम्भार्धस्य वर्गतः ।
शोधिते परिशिष्टस्य मूलं स्याद्दल लक्षणम् ।। (३२)

विष्कम्भस्याद्दलग्रस्त चापज्यार्धस्य वर्गके ।
पूर्वंज्यादलवर्गे तु विष्कम्भार्धस्य वर्गतः ।। (३३)

शोधिते परिशिष्टस्य मूलं तद्धनुर्षाश्शरः ।
सज्यावर्गष्षड् गुणेषु वर्गश्चापस्य वर्ग कः ।
शराहतस्तु कोदण्डो दलितो धनुषः फलम् ।। (३४)

विष्कम्भ आत्मद्विगुणेन (ऽपि) योज्यः ।
स चात्मविंशेन स पञ्चमाख्याम् ।
स पञ्चविंशेन च तौ समेतौ ।
व्यासेन सैषा परिणाहक्कलृप्तिः ।
नेमि द्विरेकादश धात्र कार्य-
स्तद्भाग एकश्च तथा द्विधा च ।
व्यासस्स्वरांशाः परिधेस्सहस्युः
भागांशतुर्येण स सप्तमेन ।।

(Karavinda)

१. भवतीव खलु वा एष योऽग्नि चिनुते इति विज्ञायते । (VIII. 1)
वयसां वा एष प्रतिमया चीयत इत्याकृतिचोदनात् । (VIII. 2)
वेदेर्विमानं सौमिक्याः क्रमैर्द्विद्वादशाङ्गुलैः ।
आदि त्रिसप्तसु द्वित्रिचन्द्रद्वियुग भूमिषु ।। (१)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भूत्रिभूद्विशरैकेषु शङ्कवो दशपञ्च च ।
सषट् तिलारत्नि षष्ठोनाष्टत्रिंशदरत्निका ।। (२)

विमानरज्जुश्चिह्नं स्यात्तस्यास्सप्तदशस्वथ[1] ।
पाशौ कार्य्यौ तयोर्मध्ये प्रक्रमा द्वादश स्मृताः ।। (३)

षट्त्रिंशिका वा रज्जुस्स्याद्विमाने द्व्यष्ट लक्षणा ।
श्रोणी पञ्चदशस्वाद्ये सदोऽनन्तरतुर्ययोः ।। (४)

दशस्वष्टसु तत्कोणास्तृतीयेऽरत्निमात्रकाः ।
धिष्ण्याः प्रादेशान्तराला आग्नीध्रं तु तुरीयके ।। (५)

रुद्रेषु सप्तदशसु शङ्कू पादोनितेष्विह ।
कार्य्यौ हि पञ्चमेऽर्केषु मार्जालाग्नीध्रधिष्णियौ ।। (६)

सप्तमे प्राग्वदाग्नीध्रं धानं सार्धचतुष्टये ।
उत्करो दशमे शङ्कौ मनुषूत्तरतः क्रमे ।। (७)

ऊक्थ्यगोहखनन स्थानमेकादशे पुनः ।
हविर्धानं प्राग्वदत्र पाशयोर्व्यत्यययोऽधिकः ।। (८)

षोडशस्वर्धहीनेषु शामित्रो द्वादशे भवेत् ।
शङ्क्वोरुत्तरवेदिस्स्याद् द्वयोस्सार्ध उपान्त्ययोः ।। (९)

अन्तिमे द्वादशस्वंसौ चात्वालोंऽसादुक्क्रमे[2] ।
पशुबन्धोऽस्ति चात्वालस्सोमेऽपीत्यवधार्य ते ।। (१०)

मानान्तरमनुक्त्वैव व्याख्यात इति कीर्तनात् ।
शम्यामात्रस्तु सर्वत्र व्यक्तं बोधायनोऽब्रवीत् ।। (११)

---

1. विमानरज्जु चिह्नं स्यात्तस्यां सप्तदशस्वथ ।
2. चत्वारोंऽसादुदक्रमे ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्यथाऽग्नौ विरोधस्स्यान्मानं चान्यत्र विद्यते ।
उत्तरें ऽसे महावेद्यामास्तावः परिकीर्त्तितः ।। (१२)

दक्षिणे तु हविर्धाने पञ्चात्त्रीन् प्रक्रमांस्त्यजेत् ।
पादोनद्वितयं पार्श्वेऽरत्नौ तूपरवास्स्मृताः (१३)

अर्धप्रादेशतस्तेषां भ्रमणं कोणशङ्कुषु ।
अग्रेणौपरवांस्त्यक्त्वा पादोन प्रक्रमत्रयम् ।। (१४)

शम्याभात्रश्चतुस्त्रक्तिः खरश्लिष्टस्तु[1] सञ्चरः ।
औदुम्बरसदोमध्ये[2] पृष्ठ्या दक्षिणतः क्रमे ।। (१५)

(Sundararaja)

१०. अष्टविधप्रभृतीनां यदन्यत्सप्तम्यस्तत्सप्तधा विभज्य प्रति पुरुषमावेशयेत् । (VIII. 20)

व्योमाकाशाब्धिवेदैकादभीष्टैः पुरुषैर्हतात् ।[3]
हरेत सप्तभिर्भागं तन्मूलं पुरुषो भवेत् ।। (१)

चतुरस्रश्येनचितोः प्रादेशारत्नि हीनयोः ।
तत्रतत्राङ्गुलिः कल्प्या विंशशतांशतः ।। (२)

(श्येनचिति –Sundararaja)

खाकाशश्रुतिवेदैकात् पुरुषैर्द्विगुणैर्हतात् ।
हरेत तिथिभिर्भागं तन्मूलं पुरुषो भवेत् ।। (१)

चतुरस्रश्येन चितोः प्रादेशारत्नि युक्तयोः ।
प्रउगादिषु चैव स्यात्पुरुषाङ्गुलक्लृप्तये ।। (२)

(Sundararaja)

---

1. खरः शिष्टस्तु ।
2. औदुम्बरी सदोमध्ये ।
3. वेदेकादष्टभिः पुरुषैर्हतात् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

११. स पक्षपुच्छेषु विधाभ्यासेऽपचये च विधा सप्तमकरणीं पुरुषस्थानीयां कृत्वा विहरेत् । (IX. 14)

आकाशवस्वम्बर वेद वर्ग
मिष्ट प्रवृद्धं तिथिभिर्विभक्तम् ।

तस्य प्रवृद्धस्य यमेन मूलं
सम्भावयेत्सापचये च वृद्धौ ।।

(Karavinda)

आकाशवस्वम्बर वेद (४०८०) वर्ग-
मिष्टप्रवृद्धं तिथिभिर्विभक्तम् ।
लब्धस्य वृद्धस्य यमेन मूलं[1]
वृद्धौ क्षये तत्पुरुषस्य मानम् ।।
सदाभवेत्सापचयेच वृद्धौ ।।

(Kapardi)

१२. विज्ञायते च न ज्यायांसं चित्वा कनीयांसं चिन्वीतेऽति (X. 24)

यदत्र पुच्छे प्रादेशमुपधायेति सूत्रितम् ।
तदभेदाय पुच्छाग्रे पृथग्ग्रीति निषेधकम् ।। (१)
अग्रस्य रीतिभेदे स्युर्वह्वयः पुच्छे भिदा यतः ।
अतः पुच्छादनारम्भः पुच्छाग्रप्रभृतिर्भवेत् ।। (२)
तथोपधाने तन्मूले यत्क्षेत्रमतिरिच्यते ।
चतुर्भिरर्धैः प्रादेशसहितैश्छादयेत् ततः ।। (३)
अप्यये विपरीतोक्तिरेवमर्थवती भवेत् ।
प्रादेशमात्रा नाग्रे स्युस्तथा बहुभिधा यतः ।। (४)

1. यमेन मूलं सदा भवेत्सापचये च० ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

छादने विनियुक्तानां सामर्थ्यं नास्ति यत्र तु।
तत्रान्याभिस्समर्थाभिस्तत्रत्याभिश्छदिर्भवेत् ।। (५)

प्रच्छादयेति वचनं सर्वाग्निविषयं यतः ।
अतः पञ्चमभागीया पाणिबाहुल्यहेतुका ।। (६)

व्यत्यासेनोपधानस्य व्यत्यासवचनस्य च ।
पुनः क्रिया तत्र तत्र भेदाभावैकहेतुका ।। (७)

व्यत्यासे लोकतस्सिद्धे तत्रासौ यतते यतः ।
तेनेष्टका मात्रभेदोऽप्यमृष्य इति गम्यते ।। (८)

संख्यामात्रमनूद्येह पूरणं विदधाति यत् ।
तेन मन्यामहे साम्यं सर्वप्रस्तारगोचरम् ।। (९)

न्यूने तु पूरयेदुक्तैः साम्यस्यायतनस्थितेः ।
अतिरेके क्रमाभावात् प्रस्तारास्सर्वतस्समाः ।। (१०)

(Karavinda)

१३. सन्ध्योश्च तद्वदात्मानं षडङ्गुलावेताः (XI. 11)

सन्ध्योः पक्षाप्ययोः तद्वत् पक्षाग्रवदष्टावष्टौ ।
ताश्चात्मानं षडङ्गुलेन प्राप्ताः, नवाङ्गुलेन पक्षौ ।।

(Sundararaja)

अवाधः क्लृप्तदेशानां स्तारे स्तारे च पूरणम् ।
भेदभावोऽपि चाग्नीनामाचार्याणां परायणम् ।।

(Karavinda)

१४. सन्ध्यन्तराले पञ्चमभागीयास्स पादाः (XI. 13)

१५. सर्वमाग्निं पञ्चमभागीयाभिः प्रच्छादयेत् ।। (XI. 18)
पादेष्टकाभिस्संख्यां पूरयेत् ।। (XI. 19)

अष्टौ श्रोण्यंसयोश्च स्युः पादाः सूत्रकृतेरिताः ।
तासां मध्ये चतुर्थ्यस्स्युः चतुर्दश चतुर्दश ।। (१)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सन्ध्यन्तराले पञ्चम्यः पादैश्च दशभिस्सह ।
तासां मध्ये दशप्रोक्ताः प्राच्यस्युः शुल्बकर्मणि ।। (२)

अष्टौ पुच्छस्य पूर्वार्धे चतुर्थ्यंशिशष्ठ एव तु ।
द्वितीया नवमी चैव चतुर्थी नाम वात्मनि ।। (३)

उदीच्य एव नित्यं स्युर्मध्याः पञ्चम पादकैः ।
कृताभिश्चतुरस्राभिरणकोविस्त्र्यरत्निभिः ।। (४)

अस्या एव सपादाभिः प्रस्तारो द्विशतः कृतः ।। (५)

(Kapardi)

१६. पादेष्टकाभिस्संख्यां पूरयेत् (XI. 19)

ऊर्वस्थि शब्द संयुक्ता श्रुतिर्मुख्यात्र या कृता ।
आचार्येणैव सूत्राणां षड्भागीया कृते तु सा ।। (१)

आख्यातमर्थं साचार्यैस्तथोर्वस्थीति सूत्रितम् ।
षड्भागीयापदं तद्वदप्यन्यैस्सूत्रितं परैः ।। (२)

हिरण्यकेशिनां शुल्बे तथोर्वस्थीति सूत्रितम् ।
व्याख्यातारोऽपि तत्रैतत् षड्भागीयापरं विदुः ।। (३)

बोधायनश्च भगवान् समे तु चतुरस्रके ।
तुर्य पञ्चम षष्ठैश्च सपादैः करणं व्यधात् ।। (४)

ऊर्वस्थिनामधेयानामुपदेशबलादिह ।
प्रच्छादिता नामाभिस्तद् बाधस्सूत्रकृतेष्यते ।। (५)

अरत्नयोऽप्यणूकाश्च छादने स्युर्विपर्ययात् ।
पूर्वस्मिन्नपरस्मिश्च प्रस्तारे संभवो न हि ।। (६)

न पञ्चदशभागीयाः श्रूयतेऽत्र द्वितीयके ।
श्रूयन्ते तस्तु पूर्वाग्नौ त तत्पूर्वो द्वितीयकः ।। (७)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रकृतित्वाद् द्वयोरग्न्योः नित्यत्वाच्च द्वयोरपि ।
अतस्तासां द्वितीयेऽग्नौ कथं प्राप्तिर्विमृश्यताम् (८)
किन्तु तासां तु यत्कार्यं तत्राणूकास्तु बोधिताः ।
प्रथमाग्नेरतोऽन्यत्र तत्स्थाने स्ययुरणूकिकाः ।। (९)
(Karavinda)

१७. **पादेष्टकाश्च** । (XI. 22)

व्यत्यासं चिनुयाद्यावतः प्रस्तारांश्चिकीर्षेत् । (XI. 23)
द्विविधे मानिका[1] रज्जुस्सप्तत्या च शतेन च ।
अङ्गुलीनां मिता सा स्यादूनाग्नेर्दशभिस्तिलैः ।। (१)
त्रिविधे मानिका[2] रज्जुरष्टोत्तरशतद्वयम् ।
षड्भिरेव तिलैरूना गणकैः परिकल्पता ।। (२)
विधस्यापि चतुर्थस्य मानिका रज्जुरुच्यते ।
मिताशतद्वयेनाथ चत्वारिंशाधिकेन च ।। (३)
विधस्य पञ्चमस्येयमष्टषष्टिश्शतद्वयी ।
एकादशतिलैर्युक्तां मानिकां गणका विदुः ।। (४)
चतुर्भिश्च नवत्या च शताभ्यां च मिता भवेत् ।
त्रिभिरेव तिलैरूना षड् विधस्य विधानिका ।। (५)
(Kapardi)

१८. **एकविधप्रभृतीनां करणीनां द्वादशेन त्रयोदशेनेतीष्टकाः कारयेत्** । (XI. 21)

पादेष्टकाश्च । (XI. 22)
अङ्गुल्यो विंशतिशतं करण्येक विधेभवेत् ।
द्विविधे सप्ततिशतं ज्ञेयं दशतिलोनितम् ।। (१)

---

1. मात्रिका ।
2. मात्रिका ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रिविधे द्वे शते चाष्टौ चाङ्गुल्यषषट् तिलोनिताः ।
चतुर्विधस्य करणी चत्वारिंशच्छत द्वयम् ।। (२)
अष्ट षष्टिः पञ्चविधे सैकादश तिले शते ।
पड्विधे त्रिशतात्त्याज्याषषडङ्गुल्यस्तिलावपि ।। (३)

(Sundararaja)

१९. प्रउगा इष्टकाः कारयेत् । (XII. 6)

एकोनविंशत्यरत्निभिरङ्गुलीभिस्सहाष्टभिः ।
तिलानां पंचविशत्या मिता पश्चाद् विमानिका ।। (१)
एकविंशत्यरत्निभिरङ्गुलीनां त्रिपञ्चकैः ।
तिलानामेकविंशत्या मिता त्वेका विमानिका ।। (२)
कुर्वन्ति प्रउगमग्निमेतास्तिस्रस्समीकृताः ।
आसामेव यथासूत्रं करणानि प्रकल्पयेत् ।। (३)

(Kapardi)

२० यथाविमुखे शकटे । (XII. 8)

तावदेव दीर्घचतुस्रं विहृत्य पूर्वापरयोः करण्योरर्धात्तावति दक्षिणोत्तरयोर्निपातयेत् । (XII. 9)

नित्योभयतः प्रउगम् । (XII. 10)

प्रउग चितोक्तीः । (XII. 11)

उभयतः प्रउगा इष्टकाः कारयेत् । (XII. 12)

त्रिसप्तकैस्तिलैर्युक्तां[1] साष्टाविंशशत त्रयीम् ।
प्रउगस्योत्तरस्याग्नेः तिर्यङ् मानीं विदुर्बुधाः ।। (१)
तिर्यग् द्विगुणितायामे चतुरस्रे हविर्भुजः ।
शङ्कून्निहत्य मध्येषु करणेषु चतुर्ष्वपि ।। (२)

1. त्रिसप्तकैस्ति लै स्सार्धैः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रज्जुं शङ्कुषु संयोज्य श्रोण्योरंसान् परित्यजेत् ।
शिष्टं सप्तार्धमेव स्याच्छकटे विमुखे यथा ।। (३)

चतुर्दशतिलेर्युक्तं सप्तषष्टि शत त्रयम् ।
प्रउगस्योत्तरस्यैतदीषामात्रं प्रकल्पितम् (४)

ईषाद्वादशभागेन तथा भागोत्तरेण च ।
उभयतः प्रउगीभूताः सपादाः कारयेदिह[1] ।। (५)

(Kaparadi)

२१. **तस्या करण्या द्वादशेनेष्टकाः कारयेत् ।** (XIII. 3)

तासां षट् प्रधा उपधाय शेषमष्टधा विभजेत् । (XIII. 4)

रज्जुः कृतान्यतः पाशा सप्ताशीतिशताङ्गुला ।
विमानं रथचक्रस्य करोत्येषा तु मण्डलम् ।। (१)

चतुरस्रकरणी रज्जुः चतुष्षष्टिशनद्वयी ।
तिलैस्त्रयोदशैर्युक्ता रथचक्रे हविर्भुजि ।। (२)

(Kapardi)

२२. **उपधानेऽध्यर्धाः पुरस्तात्प्रतीचीरात्मन्युपदधाति ।** (XIII. 18)

त्सर्वगें श्रोण्योश्च प्राचीः । (XIII. 19)

सर्वभंग्नि चतुरस्राभिः प्रच्छादयेत् । (XIII. 20)

पादेष्टकाभिस्संख्यां पूरयेत् । (XIII. 21)

अपरस्मिन्प्रस्तारेऽध्यर्धा दक्षिणतः उदीचीरात्मन्युपदधात्युत्तरतश्च दक्षिणाः । (XIII. 22)

त्सरुपार्श्वयोर्दक्षिणा उदीचीश्च । (XIII. 23)

---

1. उभयतः प्रउगीभूताः इष्टकाः कारयेदिह ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वमग्निं चतुरस्राभिः प्रच्छादयेत् । (XIII. 24)

पादेष्टकाभिस्संख्यां पूरयेत् । (XIII. 25)

व्यत्यासं चिनुयात् यावतः प्रस्तारांश्चिकीर्षेत् । (XIII. 26)

मितास्त्रिभिस्तिलैरूना चतुर्भिश्च शतेन च ।
द्रोणस्यैषा त्सरोर्मात्रा तस्य त्रिगुणितैव सा ।। (१)

पादा अर्धाश्च भेदास्स्युः करणानि विभावसौ ।
द्रोणाख्ये तु श्मशाने च चतुरस्रे हविर्भुजि ।। (२)

प्रस्तारे प्रथमे पादा यत्र स्युस्तत्र नोत्तरे ।
द्वावर्धौ प्रथमस्तारे चतस्र स्तूत्तरे स्तरे ।। (३)

निधाय चोत्तरे स्तारे अध्यर्धत्वविपूर्वके ।
अध्यर्धा यत्र तत्र स्युः पादा दीर्घा यदि त्वथ ।। (४)

प्राच्यस्स्युः प्रथमे स्तारे उदीच्यस्तूत्तरे स्तरे ।
अभितः पादमध्यर्धा रीतयसप्त चोत्तरे ।। (५)

(Kapardi)

२३. प्राकृतैरित्यपरम् । (**XIV. 18**)

एकैकवृद्धा एकैकधा ह्यग्नयः क्रमश एकशतम् ।
पटले तृतीय उदितास्तेषां भेदाश्चतुर्थादौ ।। (१)

प्रकृतिस्त्ववल्लीनामेकविधा वाथ सप्तविधाः ।
एकविधप्रकृतित्वे तदा षण्णां न पक्षपुच्छानि ।। (२)

सप्तविधप्रकृतित्वे भवति च तेषां सपक्षपुच्छत्वम् ।
सप्तविधप्रभृतीनां सैव भवेत्प्रकृतिरेकशतविधात् ।। (३)

करणीनां द्वादशांशैः तैरुक्तांशयुतायुतैः ।
पृथगुत्पन्नरूपाभिरिष्टकाभिस्त्रिधोपधेः ।। (४)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रैधमेकविधादीनां चातुर्विध्यं सपक्षतः ।
एवं प्रउगयुग्मस्य त्रैधं नान्यंदपक्षतः ।। (५)

द्वौ चतुरस्रौ प्रउगौ रथचक्रदोण चित्समूह्यश्च ।
पर्युपपूर्वौ चान्त्यौ श्मशानचिच्छन्दश्चितिश्येनौ ।। (६)

कङ्कचिदलजौ सप्तविधाः पञ्च पूर्ववद्दशदहनाः ।
प्रउगचिदुभयप्रउगो रथचक्रोद्रोणचिच्छ्मशानाग्निः ।। (७)

एते त्वपक्षपुच्छाः कूर्मचिदाद्याः परोक्ताश्च ।
अन्ये सपक्षपुच्छा अग्नय उक्तः प्रवक्ष्यमणाश्च ।। (८)

श्येनप्रमुखाननलान् व्याख्यास्ये पटलयोरिहोत्तरयोः ।। (९)

(Karavinda)

२४. **शिरसि चतुर्थ्यौ । (XVII. 18)**

तयोश्च पुरस्ताच्चतस्रो नवम्यः । (XVII. 19)

एषद्विशतः प्रस्तारः । (XVII. 20)

व्यत्यासं चिनुयाद्यावतः प्रस्तरांश्चिकीर्षेत् । (XVII. 21)

एकोनविंशतिस्तिर्यगङ्गुलं सतिलद्वयम् ।
यथा भवेत्तथा कार्या यथायोगनतं तु तत् ।। (१)

यथोदीच्येव षड् भागे षष्ठभागेन वर्धनम् ।
करणस्य तृतीयस्य यथायोगनतं भवेत् ।। (२)

सविशेषश्चतुर्थस्य द्विचत्वारिंशदङ्गुलम् ।
चतुर्दशतिलैर्युक्तं करणस्य भविष्यति ।। (३)

षष्ठस्य कर्मफलकं स्यात् त्रयस्त्रिंशदङ्गुलम् ।
अष्टादशतिलैर्युक्तं इतरे सूत्रचोदिते ।। (४)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पार्श्वस्थाः सप्तमस्येयं विंशत्यः सह सप्तभिः ।
षड्भिरेव तिलैरूनं फलकेऽष्टाष्टमस्य च ।। (५)

प्रथमेन तृतीयेन विपर्यस्य पुनः पुनः ।
तथा सप्तमषष्ठाभ्यां कारयेदिष्टकाः क्रतौ ।। (६)

पञ्चत्रिंशद् विपर्यस्य चतुर्थेनापि कारयेत् ।
एतावदेव कुशलाः इष्टकाकरणे विदुः ।। (७)

पुच्छे तिर्यङ् निधातव्याः चतुर्थ्यो दश चोदिताः ।
ययोश्चान्तरा तिर्यक् चतुर्थ्यस्स्युश्चतुर्दश ।। (८)

चतुर्थ्यः पार्श्वयोस्तासां षट्षट्तिर्यक्तु मध्यमाः ।।
कोणेषु तिर्यक् पञ्चम्यः षष्ठश्चाष्टौ तथाविधाः ।। (९)

आपुच्छस्याप्ययात्तद्वत् शिरसि त्रिंशदिष्यते ।
प्राच्यश्चैव प्रतीच्यश्च प्राचीष्वेव च पञ्चमी ।। (१०)

चतुर्थ्यः पार्श्वयोस्तासां तथा शिष्टे च विंशतिः ।
अन्यत्सर्वं यथासूत्रं प्रस्तारो द्विशतः क्रतौ ।। (११)

श्रोण्या[1] चैव तथैवांसौ षट्सु त्वेव तथाविधा ।
चतुर्थ्यो[2]······ दक्षिण न पैताः ।। (१२)

श्रोण्योर्दक्षिण विज्ञेयं तथा चैवांस उत्तरे ।। (१३)

(Kapardi)

२५. व्यत्यासं चिनुयाद्यावतः प्रस्तारांश्चिकीर्षेत् । (**XVII. 21**)

श्येने प्रथम आद्यस्य करणस्य प्रजस्भनम् ।
द्वितीयस्य तृतीयस्य चोच्यते फलकानतिः ।। (१)

---

1. पूर्वं नत्रयेत् ।
2. पक्षस्य ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्मिन् श्येने त्वादिमस्य करणस्य प्रजम्भनम् ।
पुच्छस्य पक्षकरणी षष्ठस्यासौ यथार्जवम् ।। (२)

द्वितीयस्य तृतीयस्य पक्षकाणां नतेः फलम् ।
व्यासस्य पक्षकरणीं षष्ठतानादिमे नतिः ।। (३)

एकोनविंशत्यङ्गुल्यस्साष्टांशं च तिलद्वयम् ।
तिर्यङ्मानी यथा सा स्यात्तथा रज्ज्वा प्रजम्भयेत् ।। (४)

सपादतिलसंयुक्तचतुरङ्गुलमात्रतः ।
पक्षस्य नमनो षष्ठः तेन स्यात्फलकानतिः ।। (५)

एवं द्वितीयश्येनोक्तमार्गेणोन्नीय जम्भनम् ।
करणस्य विधातव्यं फलकानमनं तथा ।।

(Karavinda)

पक्षकरण्यास्सप्तमं तिर्यङ्मानी, पुरुष चतुर्थ पार्श्वमानी । (XIX. 8)

तस्याक्षणया रज्ज्वा करणं प्रजम्भयेत् । (XIX. 9)

पक्षनमन्यास्सप्तमेन फलकानि नमयेत् । (XIX. 10)

पक्षेष्टकायाः करणं तथा रज्ज्वा प्रजम्भयेत् ।
तस्य तिर्यग्यथा पक्षकरण्यास्सप्तमं भवेत् ।। (१)

पक्षमध्यीयाकरणे द्राघीयः फलकद्वये ।
नमनी सप्तमेन स्यान्नतिस्सप्तम मात्रके ।। (२)

पक्षाग्रीयाकरणस्याप्येषैव नमनक्रिया ।
सप्तमेंऽशे नतिस्तस्य भागोनेऽन्यो भवेदृजुः ।। (३)

साष्टादशतिलं तिर्यग्यथा पञ्चदशाङ्गुलम् ।
भागानामिष्टकानां च तथा स्यान्नमनक्रिया ।। (४)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आद्यश्येने त्वादिमस्य करणस्य प्रजम्भनम् ।
फलं षष्ठः पक्षकरणी षष्ठव्यासो यथा भवेत् ॥ (५)

द्वितीयस्य तृतीयस्य प्रषष्ठानां नतेः फलम् ।
व्यासस्य पक्षकरणी षष्ठता नाष्टमे नतिः ॥ (६)

आद्यश्येनविषयमिदं श्लोकद्वयम्—

पक्षेष्टकाः चतस्रोऽत्र षट् च पादेष्टका अपि ।
चोडानाकसदामर्धजानोदशमकारिताः ॥ (७)
(Karavinda)

२७. अणूकाः पञ्चदशभागीयानां स्थाने । (**XX**. **19**)

व्यत्यासं चिनुयाद्यावतः प्रस्तारांश्चिकीर्षेत् । (XX. 20)

पक्षेष्टकानां करणं विपर्यस्यार्धमिष्यते ।
पक्षाग्रीयास्तथैवार्धं विपर्यस्यैव कारयेत् ॥ (१)

विपर्यस्यैव कर्तव्याष्षोडश्यः षोडशीद्वयम् ।
साहस्रेऽथ द्विषाहस्रे पञ्चषष्टिं विदुर्बुधाः ॥ (२)

उपधाने यथा सूत्र यथा वात्मनि पक्षयोः ।
पुच्छे शिरसि शिष्टे च षोडशीनां विदुर्बुधाः ॥ (३)

षट्प्राच्यः षट्प्रतीच्यश्च आत्मनि द्वादश क्षिपेत् ।
शीर्ष्णिद्वयं क्षिपेत्तिर्यगुक्ता एव चतुर्दश ॥ (४)

शिष्ट रीतिद्वयं पुच्छे तथा चात्मन्यपि द्वयम् ।
षोडशार्धेष्टकास्तास्तु क्षिपेच्च त्रिषु रीतिषु ॥ (५)

एकैकमुत्तरे पार्श्वे तिस्रस्तिस्रस्तु दक्षिणे ।
शिष्टे तिर्यग्दशैव[1] स्यादष्टोत्तरशतद्वयम् ॥ (६)

---

1. द्वितीयं ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुच्छाप्यये तु विशयाश्चतस्त्रष्षोडशीः क्षिपेत् ।
षोडश्यावप्यये प्राच्यौ ते चाग्रे शिरसि क्षिपेत् ।। (७)
मध्ये तयोश्च द्वावर्धौ चतस्त्रो विशयाः क्षिपेत् ।
आत्मनश्शेषे[1] द्वावर्धौ षोडश्यौ शिरसि क्षिपेत् ।। (८)
अन्यत्सर्वं यथासूत्रं द्वादशोनं शतद्वयम् ।
आत्मनो दक्षिणे पार्श्वे चतस्त्रो दक्षिणायताः ।। (९)
द्वितीये चोत्तरे पार्श्वे षड् द्वे श्रोण्यंसयोरपि ।
शिरसश्चाप्यये चैका शिरस्यपि[2] च दक्षिणा ।। (१०)
एता निधेयाष्षोडश्यो विपर्यस्तास्तरे द्वये ।। (११)

(Kapardi)

२८. **यथा प्रकृत्यात्मऽविकारात्** । (XXI. 7)

अर्धं त्रयोदशं व्यासमशिरस्के हविर्भुजि ।[3]
तथा चतुर्थषष्ठाभ्यां नमयेत्प्रथमं तु तत् ।। (१)
ते द्वे तु संहिते प्राची द्वियीयं करणं भवेत् ।
तृतीयमपि पड्भागमष्टभागेन वर्धितम् ।। (२)
पक्षेष्टकाञ्चतुर्थास्स्युः पुच्छं पुच्छवदुच्यते ।
षट्पञ्चाशच्चतुर्थ्यस्स्युस्तिर्यग्दक्षोद[4] गायताः ।। (३)
अष्टौ पुरस्तात्तिर्यक् च श्रोण्योः षट्पञ्चमीः क्षिपेत् ।
श्रोण्याश्चतस्त्रः पञ्चम्यो भेदवद् द्विशतस्तथा[5] ।। (४)

1. स्थिमिता आत्मन्श्शेषे ।
2. शिरसापि ।
3. व्यासं शिरस्को वा हवि ।
4. स्तिर्यगष्टोदगायताः ।
5. स्तरे ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्येनवत्पक्षपुच्छेषु निधायात्मन्यपि क्षिपेत् ।
प्राच्यां चैव प्रतीच्यां च त्रिशदेका च पञ्चमी ।। (५)

तासामेवोत्तरे पार्श्वे चतुर्थ्यः षोडशद्वयम् ।
प्राच्यश्चैव प्रतीच्यश्च तथा षोडश दक्षिणे ।। (६)

प्राचीश्चैव प्रतीचीश्च शिष्टे पञ्चमीं क्षिपेत् ।
करणस्य विपर्यासं चतुर्थस्यैव नेष्यते ।। (७)

सप्रादेशेऽपि वा पुच्छे विस्तारो द्वादशं भवेत् ।
तथा चतुर्थषष्ठाभ्यां नमयेत्प्रथमं तु ततः ।। (८)

ते द्वे तु संहिते प्राची द्वितीयं करणं हि तत् ।
तृतीयमपि षड्भागमष्टभागेन वर्धितम् ।। (९)

द्वाविंशतिर्द्विगुणितं तिलानां चापि विंशतिः ।
सविशेषश्चतुर्थस्य तिर्यक् सत्यधिकं[1] भवेत् ।। (१०)

पञ्चमं प्राकृतं विद्यात् षष्ठस्य विकृतास्त्रयः ।
षष्ठस्य पार्श्वं त्र्याधिक कर्णः षट्त्रिंशदष्टभिः ।। (११)

सप्तमाष्टमयोः पार्श्वमूनत्रिंशमिहेष्यते ।
आयामश्चापि षट्त्रिंशच्चतुर्दशतिलैस्सह ।। (१२)

चतुर्थाद्यास्तु विकृताः पुच्छे चैवात्मनि[2] क्षिपेत् ।
अष्टादशाङ्गुलं पुच्छे शययोरन्यदात्मनि ।। (१३) (Kapardi)

२९. यथा प्रकृत्यात्माऽविकारात् । (XXI. 7)

अथो एतच्छ्येनचितं चिन्वीतेति । (XXI. 8)

आदित्यपक्षाप्ययगा द्वे षष्ठ्यौ पञ्चमी तथा ।
पञ्चम्येकान्त्यरीत्याऽतो द्वे षष्ठ्यावप्ययः पुरः ।। (१)

---

1. तिर्यक्तु त्रिभिः कपम्येत् । 2. नैवा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षष्ट्यावेका पञ्चमी स्याद् द्वितीयस्यामथावलौ ।
मध्ये षोडश षष्ठ्यः स्युरेवसष्टमरीतिगाः ।। (२)

चतुर्थषष्ठरीत्यौ तु प्रथमोत्तरवत्तथा ।
आत्मशेषं चतुर्थीभिः पुच्छगोचराः ।। (३)

सप्तम्यो द्वादशाष्टम्यस्त्रयोदश च पूर्ववत् ।
एवं द्वितीय प्रस्तारो द्वितीयेऽष्टक इष्यते ।। (४)

(Sundararaja)

३०. **तत्रपुरुषाभ्यासो नारत्नि प्रादेशानाम् ।** (XXI. 14)

संख्या संयोगात् संख्या संयोगात् । (XXI. 15)

सचित्यो राजसिंहस्य सञ्चितः कुशलैर्द्विजैः ।
गारुडो रुक्मपक्षो वै त्रिगुणोऽष्टादशात्मकः ।। (१)

(Sundararaja)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कात्यायन-शुल्बसूत्रम्

KATYAYANA SULBA-SUTRAM

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रथमा कण्डिका

१. रज्जुसमासं वक्ष्यामः ।

२. समे शङ्कुं निखाय शङ्कु सम्मितया रज्ज्वा मण्डलं परिलिख्य यत्र लेखयोः शङ्क्वग्रच्छाया निपतति तत्र शङ्कू निहन्ति, सा प्राची ।

३. तदनन्तरꣳ रज्ज्वाऽभ्यस्य पाशौ कृत्वा शङ्क्वोः पाशौ प्रतिमुच्य दक्षिणायम्य मध्ये शङ्कुमेवमुत्तरतः सोदीची ।

४. रज्ज्वन्तयोः पाशौ करोति ।

५. श्रोण्यꣳसनिरञ्छन संख्यासमासभङ्गेषु लक्षणानि ।

६. प्राच्यन्तयोः शङ्कू निहन्ति ।

७. श्रोण्योरꣳसयोश्च ।

८. शङ्क्वोः पाशौ प्रतिमुच्य निरञ्छयेन गृहीत्वा दक्षिणापूर्वो दिशꣳहरन्ति ।

९. एवमुत्तरतः ।

१०. विपर्यस्येतरतः ।

११. स समाधिः सर्वत्र ।

१२. प्रमाणमभ्यस्याभ्यासचतुर्थे लक्षणं करोति' तन्निरञ्छनम् ।

१३. अक्ष्णया तिर्यङ्मानी शेषः ।

१४. प्रमाणार्धं वाभ्यस्याभ्यास षष्ठे लक्षणं करोति तन्निरञ्छनम् ।

१५. अक्ष्णया तिर्यङ्मानी शेषः ।

१६. प्रमाणार्धं समचतुरस्रस्य शङ्कुः ।

१७. शास्त्रवदर्द्धे दीर्घचतुरस्रस्य ।

१८. शकटमुखस्य चैवम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१६. एतेन प्राग्वंशवेदिमानानि व्याख्यातानि ।

२०. शालामानं च ।

२१. तत्रोदीची प्राचीवत् ।

२२. सदसश्चैवम् ।

२३. अपरिमितं प्रमाणाद्भूयः ।

२४. प्रमाणे शास्त्रं प्रमाणं निर्ह्रासविवृध्योः ।

२५. योगश्च ।

२६. इतरस्य वितृतीये दक्षिणत इत्येतद्वक्ष्यामः ।

२७. गार्हपत्याहवनीययोरन्तरालᳫं षढ्ढा सप्तधा वा गन्तुसमं त्रेधा विभज्यापरवितृतीय लक्षणेन दक्षिणायम्य तस्मिन्नग्निः ।

२८. विपर्यस्योत्तरत उत्करः ।

२९. अपिवान्तर त्रिभागोऽनया रज्ज्वा पूर्वार्धे समचतुरस्रं कृत्वा श्रोण्यामग्निः ।

३०. विपर्यस्योत्तराᳫंस उत्करः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ द्वितीया कण्डिका

१. अङ्गुलै रथसंमितायाः प्रमाणम् ।

२. तत्राष्टाशीतिशतमीषा ।

३. चतुः शतमक्षः ।

४. षडशीतिर्युगम् ।

५. चत्वारोऽष्टकाः शम्या ।

६. पैतृक्यां द्वि पुरुषꣳ समचतुरस्रं कृत्वा करणीमध्ये शङ्कवः, स समाधिः ।

७. करणी तत्करणी तिर्यङ्मानी पार्श्वमान्यक्षणया चेति रज्जवः ।

८. पदं तिर्थङ्मानी त्रिपदा पार्श्वमानी तस्याक्षणया रज्जुर्दशकरणी ।

९. एवं द्विपदा तिर्यङ्मानी षट्पदा पार्श्वमानी तस्याक्षणया रज्जुश्चत्वारिꣳशत्करणी ।

१०. उपदिष्टं युगप्रमाणं शम्याप्रमाणं च दर्शनात् ।

११. दीर्घचतुरस्रस्याक्षणया रज्जुस्तिर्यङ्मानी पार्श्वमानी च यत्पृथग्भूते कुरुतस्तदुभयं करोतीति क्षेत्रज्ञानम् ।

१२. समचतुरस्रस्याक्षणया रज्जुर्द्विकरणी ।

१३. करणी तृतीयेन वर्धयेत्तच्च स्वचतुर्थेनात्मचतुस्त्रिꣳशांनेन स विशेष इति विशेषः ।

१४. प्रमाणं तिर्यक् द्विकरण्यायामस्तस्याक्षणया रज्जुस्त्रिकरणी ।

१५. तृतीय करण्येतेन व्याख्याता ।

१६. प्रमाण विभागस्तु नवधा ।

१७. करणी तृतीयं नवभागः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१८. नवभागास्त्रयस्तृतीयकरणी ।

१९. सौत्रामण्यां प्रक्रमार्था ।

२०. तृतीयकरणी समासार्था ।

२१. तुल्य प्रमाणानाञ्च समचतुरस्राणामुक्तः समासः ।

२२. नानाप्रमाणसमासे ह्रसीयसः करण्या वर्षीयसोपच्छिन्द्यात्तस्या-क्ष्णया रज्जुरुभे समस्यतीति समासः । (३० + २२ = ५२)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ तृतीया कण्डिका

१. चतुरस्राच्चतुरस्रं निर्जिहीर्षन्यावन्निर्जिहीर्षेत्, तावदुभयतोऽपच्छिद्य शङ्कू निखाय पार्श्वमानीं कृत्वा पार्श्वमानीसम्मितामक्षणयां तत्रोपसंहरति, स समासेऽपच्छेदः, सा करण्येष निर्ह्रासः ।

२. दीर्घचतुरस्रं समचतुरस्रं चिकीर्षन्मध्ये तिर्यगपच्छिद्यान्यतर-द्विभज्येतरत्पुरस्ताद् दक्षिणतश्चोपदध्याच्छेषमागन्तुना पूरयेत् तस्योक्तो निर्ह्रासः ।

३. अतिदीर्घं चेत् तिर्यङ्मान्यापच्छिद्यापच्छिद्यैकसमासेन समस्य शेषं यथायोगमुपसंहरेदित्येकः समासः ।

४. समचतुरस्रं दीर्घचतुरस्रं चिकीर्षन् मध्येऽक्षणयाऽपच्छिद्यतच्च विभज्यान्यतरत्पुरस्ता दुत्तरतश्चोपदध्याद् विषमं चेद्यथायोग-मुपसंहरेदिति व्यासः ।

५. प्रमाणं चतुरस्रमादेशादन्यत् ।

६. द्विःप्रमाणा चतुःकरणी, त्रिःप्रमाणा नवकरणी, चतुःप्रमाणा षोडशकरणी ।

७. यावत् प्रमाणा रज्जुर्भवति तावन्तस्तावन्तो वर्गा भवन्ति तान्त्समस्येत् ।

८. अर्धप्रमाणेन पादप्रमाणं विधीयते ।

९. तृतीयेन नवमोंऽशः ।

१०. चतुर्थेन षोडशी कला ।

११. एष निर्ह्रासस्तस्य पुरस्तादुक्तं शास्त्रम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१२. यावत्प्रमाणा रज्जुर्भवतीति विवृद्धे ह्रासो भवति ।

१३. चतुरस्रं मण्डलं चिकीर्षन्मध्यादंऽसे निपात्य पार्श्वतः परिलिख्य तत्र यदतिरिक्तं भवति, तस्य तृतीयेन सह मण्डलं परिलिखेत्स समाधिः ।

१४. मण्डलं चतुरस्रं चिकीर्षन् विष्कम्भं पञ्चदशभागान् कृत्वा द्वावुद्धरेच्छेषः करणी । (५२+१४=६६)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ चतुर्थी कण्डिका

१. द्रोणचिद् रथचक्र चित् कङ्कचित् प्रउगचिदुभयतः प्रउगः समुह्यपुरीष इत्यग्नयः ।

२. द्रोणे यावानग्निः सपक्षपुच्छ विशेषस्तावच्चतुरस्रं कृत्वा द्रोणदशमविभागो वृन्तमित्येके ।

३. तद्दशमेनापच्छिद्यापच्छिद्यैकसमासेन समस्य निर्हृत्य सर्वमग्नि तथाकृति कृत्वा पुरस्तात् पश्चाद्वोपदध्यात् ।

४. मण्डलेऽप्येवम् ।

५. प्रउगे यावानग्निः सपक्षपुच्छविशेषस्तावद् द्विगुणं चतुरस्रं कृत्वा यः पुरस्तात्करणीमध्ये शङ्कुर्यौ च श्रोण्योः सोऽग्निः ।

६. उभयतः प्रउगे तावदेव दीर्घचतुरस्रं कृत्वा करणीमध्येषु शङ्कवः स समाधिः ।

७. प्रउगं चतुरस्रं चिकीर्षन्मध्ये प्राञ्चमपच्छिद्य विपर्यस्येतरत उपधाय दीर्घचतुरस्रसमासेन समस्येत्स समाधिः ।

८. उभयतः प्रउगं चेन्मध्ये तिर्यगपच्छिद्य पूर्ववत् समस्येत् ।

९. एतेनैव त्रिकर्णसमासो व्याख्यातः ।

१०. पञ्चकर्णानां च ।

११. प्रउगेऽपच्छिद्यैककर्णानाम् ।

१२. द्विकर्णानां समचतुरस्रेऽपच्छिद्य । (६६ + १२ = ७८)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पञ्चमी कण्डिका

१. उत्तरेषु पुरुषोच्चयेनैकशतविधादित्येतद् वक्ष्यामः ।

२. आद्योऽग्नि द्विगुणस्त्रिगुणो भवतीति सर्वसमासः ।

३. एकविंशतिविधो भवतीति पुरुषाभ्यासः ।

४. पुरुषाभ्यासे यावानग्निः सपक्षपुच्छविशेषस्तावच्चतुरस्रं कृत्वा तस्मिन्पुरुषप्रमाणमवदध्यात् ।

५. समस्तं पञ्चदशभागान्कृत्वा द्वावेकसमासेन समस्येत्स पुरुषः ।

६. पञ्चविभागेन बृहती तस्य दशम विभागेन पादमात्री भवति ।

७. पुरुषं वा पञ्चमेनोभयतोऽपच्छिद्य पञ्चविभागान् समस्य तृतीयं निर्हृत्य तस्मिन्पुरुषप्रमाणेऽवदध्यादित्यपरम् ।

८. पञ्चदशविभागोऽष्टाङ्गुलम् ।

९. पञ्चारत्निर्दशवितस्तिर्विंशतिशताङ्गुलः पुरुष इत्येतस्माद् द्वादशाङ्गुलं पदमिति च ।

१०. पुरुषं वा सप्तमेनोभयतोपच्छिद्य सप्तभागान् समस्य ससप्तमभागमङ्गुलं निर्हृत्य पुरुष प्रमाणेऽवदध्यादित्यपरम् ।

११. नारत्नि वितस्तीनां समासो विद्यते संख्यायोगादिति श्रुतेः ।

(७८ + ११ = ८९)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ षष्ठी कण्डिका

१. यथाग्नि वेदीष्टकाप्रमाणं वर्द्धत इत्येतद् वक्ष्यामः ।

२. या करणी चतुर्दश प्रक्रमान्सङ्क्षिपति त्रींश्च प्रक्रम सप्तम भागान्त्स एकशतविधे प्रक्रमः ।

३. द्वितीये वा सप्तसु प्रक्रमेषु प्रक्रममवधाय तस्य सप्तमभागेन प्रक्रमार्थः ।

४. प्रक्रमेण वा सप्तमभागेन प्रक्रमार्थः ।

५. एवंमैकशतविधात् ।

६. नान्तःपात्यगार्हपत्ययोर्वृद्धिर्भवति तावदेव योनिर्भवति न वै जातं गर्भं योनिरनुवर्धत इति श्रुतेर्वृद्धेरत्यन्तं प्रतिषेधः ।

७. यावत् प्रमाणानि समचतुरस्राण्येकीकर्त्तुं चिकीर्षेदेकोनानि तानि भवन्ति तिर्यग् द्विगुणान्येकत एकाधिकानि त्र्यस्त्रिर्भवति तस्येषुस्तत् करोति ।

८. यथायूपं वेदिवर्द्धनमित्येतद् वक्ष्यामः ।

९. या रज्जुरेका दशोपरवान्सङ्क्षिपति दश च रथाक्षांश्स्तस्या यश्चतुर्विंशशो भागः स प्रक्रमः ।

१०. तेन वेदिं निर्माय द्वादशाङ्गुलं पुरस्तादपच्छिद्य तद् यूपावट् याच्छङ्कोः पुरस्तात्प्राञ्चमवधाय तस्मिन्यूपान्मिनोति ।

११. पार्श्वयोर्वाऽर्धमन्तर्वेदीति श्रुतेरर्द्धकानिति ।

१२. एके प्रथमोत्तमौ प्रकृतिवत् ।

१३. सैषा शिखिण्डिनी वेदिः । (८९+१३=१०२)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[1]

१. द्विहस्ते लक्षणं कुर्यात् त्रिहस्तो मध्यमः शिरः ।
शिरः पश्चाद् वितस्तिः स्यात्पूर्वार्धे हस्त एव च ।।

२. सार्धहस्ते च पाशः स्याद् वेदिः स्यात्पौर्णमासिकी ।
सङ्ख्याज्ञः परिमाणज्ञः समसूत्र निरञ्छकः ।।

३. समभूमौ भवेद् विद्वाञ्छुल्बवित् परिपृच्छकः ।
न जलात्सममन्यत्स्यान्नान्यद्वातात्प्रमा भवेत् ।।

४. नान्यद्दूरं भ्रमादूर्ध्वं नान्यत्सूत्रादृजुर्भवेत् ।
तिर्यङ्मान्याश्च सर्वार्थैः पार्श्वमान्याश्च योगवित् ।।

५. करणीनां विभागज्ञो नित्योद्युक्तश्च कर्मसु ।।
शास्त्रबुद्ध्या विभागज्ञः परशास्त्र कुतूहलः ।

६. शिल्पिभ्यः स्थपतिभ्यश्च, आददीत मतीः सदा ।
षडङ्गुल परीणाहं द्वादशाङ्गुल मुच्छ्रितम् ।।

७. जरठं चाव्रणं चैव शङ्कुं कुर्याद् विशेषतः ।
द्विवितस्ति प्रमाणस्तु खादिरो मुद्गरस्तथा ।।

८. शङ्कुस्तेन निखातव्यस्तस्मात्तस्य परिग्रहः ।
एकतस्तु ऋजुस्तीक्ष्णः खादिरः सममायतः ।।

९. शङ्कुः कार्यस्तु शुल्बज्ञैस्तस्यार्धं गमयेन्महीम् ।
प्रादेशमात्रो हविर्यज्ञे पूर्वलक्षणलक्षितः ।।

१०. शङ्कुरामशिराः कार्यस्तस्याऽप्यर्धं निखापयेत् ।
चतुरस्त्रं मुद्गरं स्यात् षोडशाङ्गुलमायतम् ।।

११. अविद्धं रमणीयं च दारुमध्याच्च निर्मितम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अजीर्णा ग्रन्थिनी सूक्ष्मा समा श्लक्ष्णा त्वरोमशा ॥

१२. रज्जुर्मानाधिका कार्या अध्वरे योगमिच्छता ।
शाणी वा बाल्वजी चैव वैणवी वा विधीयते ॥

१३. रज्जुस्तूभयतः पाशा त्रिवृता यज्ञकर्मणि ।
रज्जुर्मुञ्जमयी कार्या शणैस्तु परिमिश्रिता ॥

१४. कात्यायनो वदत्येवमखण्डा कुशबल्वजैः ।
नवके लक्षणं कुर्यात्त्रीणि कुर्यात् त्रिषु त्रिषु ॥

१५. उत्तमो नवकः पाशः सदसो मानमुच्यते ।
पञ्चदशमथैक विंशतिकमपरं परतस्त्रिकं च ॥

१६. द्वादशसु पाश उत्तम इति सोमे रज्जुमानमेतत् ।
पदस्याक्षणया तिरश्ची तयोरक्षणया भवेत् ॥

१७. सौत्रामण्यां मिमातव्या वेदिः स्यात्सोमवत्तथा ।
नीहारेण घनैर्वापि ज्योतिषामभ्रदर्शने ॥

१८. अप्सु दीपं प्रगृह्णीयाद्यावत्तमसि दर्शने ।
प्रमाणं च प्रमेयं च यच्चान्यद् वस्तु संज्ञकम् ॥

१९. सर्वं तच्छास्त्रतो ज्ञात्वा यज्ञे सिद्ध्यन्ति याज्ञिकाः ।
यथा न क्षीयते मानं यथा च न विवर्धते ॥

२०. यथा च रमते दृष्टिस्तथा योगं समाचरेत् ।
अरत्निश्चतुरस्रस्तु पूर्वस्याग्नेः खरो भवेत् ॥

२१. रथचक्राकृतिः पश्चाच्चन्द्रार्ध इव दक्षिणः ।
अग्नीनां तु खरः कार्यो मेखलात्रय संयुतः ॥

२२. द्वादशाङ्गुल उच्छ्राये विस्तारे चतुरङ्गुलः ।
तन्तुः पुष्करनालस्य षड्गुणः परिवेष्टितः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२३. वत्सतर्यास्त्रिहायण्या बालेन सदृशो भवेत् ।
त्रयस्त्रिहायणीबालाः सर्षपार्धं प्रचक्षते ॥

२४. द्विगुणं सर्षपं विद्याद् यवः पञ्च तु सर्षपाः ।
अङ्गुलस्य प्रमाणं तु षड्यवाः पार्श्वसंस्थिताः ॥

२५. चतुर्विंशाङ्गुलोऽरत्निर्वितस्तिर्द्वादशाङ्गुला ।
व्यासस्यात्र प्रमाणं तु चतुर्न्यूनं शतं भवेत् ॥

२६. पुरुषस्य प्रमाणं वै विंशतिस्तु शताधिका ।
हिरण्यशकलार्थे तु हिरण्यं यस्य नोच्यते ॥

२७. कृष्णलेनैव तद्व्याख्या यज्ञे सिध्यति याज्ञिकी ।
कृष्णलं त्रियवं मानं ताम्रायसमतः परम् ॥

२८. सुवर्णादर्धं च माषाणां सुवर्णाश्च त्रिसप्ततिः ।
त्रीणि चैव सहस्राणि दद्याद्बहुसुवर्णके ॥

२९. भूयः स्थपतितो ज्ञात्वा संज्ञास्वन्यासु मानवित् ।
स्वर्णकारो यथाऽभ्यासात्तथा भूयो विवर्द्धते ॥

३०. ह्रसते शोषपाकाभ्यां द्वात्रिंशद्भागमिष्टका ।
तस्मादार्द्रप्रमाणं तु कुर्यान्मानाधिकं बुधः ॥

३१. अज्ञात्वा शुल्बसद्भावं यज्ञे सौत्रामणीसुते ।
वेदिं ये कर्त्तुमिच्छन्ति गिरिं भिन्दन्ति ते नखैः ॥

३२. दण्डरज्ज्वर्धमभ्यस्य षष्ठे त्वर्धस्य लक्षणम् ।
तथैव चेतरत्रापि तिर्यङ्मानं यदृच्छया ॥

३३. यावत्प्रमाणा रज्जुः स्यात्तावानेवागमो भवेत् ।
आगमार्धे भवेच्छङ्कुस्तदर्धे च निरञ्छनम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३४. आधाने पदिकं कुर्यात् द्विपदः सौमिको भवेत् ।
अग्नौ च त्रिपदं कुर्यात् प्रक्रमं याज्ञिको बुधः ॥

३५. कृत्तिका श्रवणः पुष्यश्चित्रास्वात्योर्यदन्तरम् ।
एतत्प्राच्या दिशो रूपं युगमात्रोदिते पुरः ॥

३६. पञ्चाशच्छर्कराः पश्चात्पूर्वे देयास्त्रि सप्ततिः ।
दक्षिणे तु प्रदातव्या दशपञ्च च सप्त च ॥

३७. शंस्यश्चतुर्विंशति पार्श्वे भागश्चतुर्दशभिः परिलेख्यस्तुनर्य्यम् ।
तथैव चाष्ट द्विगुणै रथर्य्यस्त्रिशद्भिरायम्य हरेत्तृतीयम् ॥

३८. अग्रेरुदक्सादर्धनवाङ्गुले मध्यं ततो लिखेत् ।
वृत्तमेकोनविंशत्या प्राचीज्या मध्यगा भवेत् ॥

३९. उदगदर्धं विहायार्वाक् खरोग्नेर्दक्षिणस्य तु ।
सूत्रदोषदरिद्रस्य गूढमन्त्रस्य धीमतः ॥ ॥

४०. समाप्तेयं क्रिया शौल्बी कात्यायनमहात्मनः ॥

[From the concluding portion of Upadhyaya Kirka's commentary on the **"Sulba Sutra** of Katyayana"]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

[2]

A. ग्रन्थाधिकारिनिरूपणाय श्लोका : (By an unknown geometer)

१. संख्याज्ञः परिमाणज्ञः समसूत्रनिरञ्छकः ।
समभूमौ भवेद् विद्वाञ्छुल्बवित् परिपृच्छकः ।।

२. शास्त्रबुद्धिविभागज्ञः परशास्त्रकुतूहलः ।
शिल्पिभ्यः स्थपतिभ्यश्चाप्याददीत मतीः सदा ।।

३. तिर्य्यङ्मान्याश्च सर्वार्थः पार्श्वमान्याश्च योगवित् ।
करणीनां विभागज्ञो नित्योद्युक्तश्च सर्वदा ।।

B. भूसमत्वाद्युपायः—

४. न जलात् सममन्यत्तु नान्यद्वृत्तात्प्रमा भवेत् ।
नान्यद्दूरं भ्रमादूर्ध्वं नान्यत्सूत्रादृजुर्भवेत् ।।

C. शङ्कुलक्षणम्—

५. षडङ्गुणपरीणाहं द्वादशाङ्गुलमुच्छ्रितम् ।
जरठञ्चाव्रणञ्चैव शङ्कुं कुर्य्याद् विशेषतः ।।

६. एकतश्च ऋजुस्तीक्ष्णः खादिरः सममायतः ।
शङ्कुः कार्य्यस्तु शुल्बज्ञैस्तस्यादर्धं गमयेन्महीम् ।।

७. प्रादेशमात्रो हविर्यज्ञे पूर्वलक्षणलक्षितः ।
शङ्कुरामशिराः कार्य्यस्तस्याप्यदर्धं निखातयेत् ।।

D. आमशिराः – अशुष्कशिराः । मुद्गरलक्षणम्—

८. द्विवितस्ति प्रमाणस्तु खादिरो मुद्गरो भवेत् ।
शङ्कुस्तेन निखेयः स्यात् तस्मात् तस्य परिग्रहः ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९. मुद्गरं चतुरस्रं स्यात् षोडशाङ्गुलमायतम् ।
प्रमध्य विद्धं रमणं दारुमध्याच्च निर्म्मितम् ॥

E. रज्जुलक्षणम—

१०. अजीर्णा ग्रन्थिनी सूक्ष्मा समाश्लक्ष्णा त्वरोमशा ।
रज्जुर्मानाधिका कार्य्या अध्वरे योगमिच्छता ॥

११. शाणी वा बाल्वजी वापि वैणवी वा विधीयते ।
रज्जुश्चोभयतः पाशा त्रिवृता यज्ञ कर्म्मणि ॥

१२. रज्जुर्मुञ्जमयी कार्य्या शणैस्तु परिमिश्रिता ।
कात्यायनो वदत्येवमखण्डा कुशबल्वजैः ॥

F. शङ्कुसमीकरणम्—

१३. शङ्कुस्त्र्यंशश्चतुर्भागवृत्तार्द्धं पञ्चभागिकाः ।
शलाकादत्तदिग्भ्योऽग्नेः शङ्क्वग्रमृजुपाति तु ॥

G. प्राचीज्ञानायाह—

१४. कृत्तिका श्रवणः पुष्यः चित्रास्वात्योर्यदन्तरम् ।
एतत् प्राच्या दिशो रूपं युगमात्रो दिते पुरः ॥

H. चतुरस्रसाधनम्—

१६. यावत्प्रमाणा रज्जुः स्यात्तावानेवागमो भवेत् ।
आगमार्द्धं भवेच्छङ्कुस्तदर्द्धेन निरञ्छनम् ॥

१७. आधाने पदिकं कुर्य्यात् सोमे तु द्विपदो भवेत् ।
अग्नौ च त्रिपदं कुर्य्यात्प्रक्रमं याज्ञिको बुधः ॥

१७. पञ्चदशमथैकविंशं त्रिक्रमपरं परतस्त्रिकं चापि ।
द्वादशसु पाश उत्तम इति सोमे वेदिमानमिह ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

I. प्राकृत वेदिमाह—

१८. षडरत्निर्द्विपाशा च मध्ये पञ्चसु चिह्निता ।
द्विहस्तेऽङ्गुल षट्के च त्रिष्वष्टादशकेषु च ।।
सार्द्धहस्ते च पाशः स्याद् वेदिः स्यात्पौर्णमासिकी ।।

J. मध्यसंग्रहविधिमाह—

१९. आनीय रज्जुं पूर्वार्द्धात्पश्चार्द्धं यावदेव तु ।
द्विगुणी कृत्य तां रज्जु तत्र शङ्कुं निखातयेत् ।।

२०. वेदि श्रोण्यंसयोर्मध्ये तया रज्ज्वाऽष्टभागया ।
वा पृथुत्वतुरीयेण मध्येनालिख्य संग्रहौ ।।

K. पशुवेदिमाह—

२१. नवारत्निमिता रज्जुर्लक्षिता षट्स्वतःपरम् ।
अर्द्धेऽर्द्धे त्रिषु पाशः स्यात्पशुवेदि प्रसाधिनी ।।

L. शालाविमितयोर्मानमाह—

२२. विंशत्या तु करैः शाला दशायामेन विस्तृता ।
विमितं चतुरस्रं स्याद् दशारत्नि प्रमाणतः ।।

M. सदसोमानमाह—

२३. नवके लक्षणं कुर्य्यात् त्रीणि कुर्य्यात् त्रिषु त्रिषु ।
उत्तमो नवकः पाशः सदसो मानमुच्यते ।।

N. सौत्रामणी वेदिमाह—

२४. पदस्याक्षण्या तिरश्ची च तयोरक्षण्यां च या भवेत् ।
सौत्रामण्यां मिमातव्या वेदिः स्यात्सोमवत्तथा ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२५. अनेन विधिना यस्तु वेदिं कुर्य्यात्तु मानवः ।
यजमानं तथात्मानमुभौ तारयते ध्रुवम् ।।

२६. आज्ञात्वा शुल्बसद्भावं यज्ञे सौत्रामणीसुते ।
वेदिं ये कर्त्तुमिच्छन्ति गिरिं भिन्दन्ति ते नखैः ।।

२७. प्रमाणञ्च प्रमेयञ्च यच्चान्यद् वस्तु संज्ञितम् ।
सर्वं तत्छास्त्रतो ज्ञात्वा यज्ञे सिध्यन्ति याज्ञिकाः ।।

२८. यथा न क्षीयते मानं यथा च न विवर्द्धते ।
यथा च रमते दृष्टिस्तथा योगं समाचरेत् ।।

O. अङ्गुलादि मानमाह—

२९. तन्तुः पुष्करनालस्य षड्गुणः परिवेष्टितः ।
वत्सतर्य्यास्त्रिहायण्या बालेन सदृशो भवेत् ।।

३०. त्रयस्त्रिहायणी बालाः सर्षपार्द्धं विधीयते ।
द्विगुणं सर्षपं विद्याद् यवः पञ्चैव सर्षपाः ।।

३१. अङ्गुलस्य प्रमाणन्तु षड्यवाः पार्श्व सम्मिताः ।
चतुर्विंशाङ्गुलोऽरत्निर्वितस्ति द्वादशाङ्गुला ।।

३२. व्यासस्य च प्रमाणन्तु चतुर्न्यूनं शताङ्गुलम् ।
पुरुषस्य प्रमाणन्तु विंशतिश्च शताधिकाः ।।

३३. ह्रसते पाकशोषाभ्यां द्वात्रिंशद् भागमिष्टका ।
तस्मादार्द्र प्रमाणन्तु कार्य्यं मानाधिकं बुधैः ।।

P. खर लक्षणमाह—

३४. अग्नीनां तु खरः कार्य्यो मेखला त्रयसंयुतः ।
द्वादशाङ्गुल उच्छ्राये विस्तारे चतुरङ्गुलः ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३५. अरत्निश्चतुरस्रस्य पूर्वस्याग्नेः खरो भवेत् ।
रथचक्राकृतिः पश्चाच्चन्द्रार्द्ध इव दक्षिणः ।।

Q. दक्षिणाग्नेः खरसाधनोपायः—

३६. अग्नेरुदक् सार्द्धनवाङ्गुले मध्यं ततो लिखेत् ।
वृत्तमेकोन विंशत्या दक्षिणार्द्धं खरस्य तु ।।

३७. चतुरस्रन्तु यावद्भिः प्रमाणैः कर्त्तुमिष्यते ।
एकोनद्विगुणै स्तैस्तु रज्जुरेकाधिकैर्मता ।।

३८. त्र्यस्रीकृते तु तस्यां या मत्स्य संक्षेपिका भवेत् ।
सैवेषुः करणी प्रोक्ता शुल्बकारेण चोदिता ।।
(मत्स्य संक्षेपिका रज्जुरिषुर्नाम, स च तावत्करणीत्यर्थः)

३९. चयने तूक्तविधिना कूर्यान्निर्माणमात्मनः ।
तुर्य्यांशिनात्मनः पक्षौ पुच्छञ्च रचयेत्ततः ।।

४०. अधिमानं पञ्चमांशं पक्षयोरुभयोर्न्यसेत् ।
दशमांशेन पुच्छस्य पुच्छमप्यत्र वर्द्धयेत् ।।
पुच्छस्य पक्षयोश्चापि पश्चादेवं नियोजयेत् ।
दशमांशं पञ्चमांशं लक्षणन्त्वधिमानकम् ।।

(Concluding portion of Mahidhara's Commentary on the **Katyayana Sulba Sutras**)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मानव शुल्बसूत्रम्

MANAVA SULBA-SUTRAM

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रथमः पटलः

प्रथमः खण्डः

१. अथातः शुल्बश्ंव्याख्यास्यामः ।

२. रज्जुं पाशवतीश्ंसमां निरायतां पृष्ठयाश्ंयथार्थमुपकल्पयेत् ।

३. अन्तरेण चित्रास्वाती श्रवणप्रतिश्रवणौ कृत्तिकाप्रतिकृत्तिके तिष्यपुनर्वसू च प्राग्देशोऽयं युगमात्रोदितयोः पाशान्च ।

४. दार्शिक्याः शयाः षट्तानि सप्त सप्तदशैव तु ।
एकं द्वे पञ्च तैर्मीत्वा समरैः परिलेखयेत् ।।

५. अश्ंसाच्छ्रोणौ रज्ज्वन्तं प्रतिष्ठाप्य प्राचीमनुलिखेत्, अश्ंसे प्रतिष्ठाप्य प्रतीचीश्ं, समरे रज्ज्वतं प्रतिष्ठाप्य श्रोणेरध्यश्ं-सादनुलिखेत् ।

६. एवमुत्तरतः पुरस्तात्पश्चाच्च ।

७. अरत्निश्चतुरस्रस्तुपूर्वस्याग्नेः खरो भवेत् ।
रथचक्राकृतिः पश्चाच्चन्द्रार्धेन तु दक्षिणे ।।

८. मध्यात्कोटि प्रमाणेन मण्डलं परिलेखयेत् ।
अतिरिक्त त्रिभागेन सर्वं तु सहमण्डलम् ।
चतुरस्रेऽक्षणया रज्जुर्मध्यतः संनिपातयेत् ।
परिलेख्य तदर्धेनार्धमण्डलमेव तत् ।।

९. गार्हपत्याहवनीयावन्तरा रज्जुं निमायापरस्मिश्ंस्तृतीये लक्षणं, मध्यात्तुरीयमुत्सृज्य लक्षणं पाशान्तौ समाहृत्य दक्षिणतो दक्षिणाग्नेर्लक्षणम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१०. एतदेव विपर्यस्योत्तरत उत्करस्य लक्षणम् ।

११. यावत्प्रमाणा रज्जुः स्यात्तावदेवागमो भवेत् ।
आगमार्धे भवेच्छङ्कुः शङ्कोरर्धे निराञ्छनम् ।।

१२. समन्तचतुरस्राणि विधिरेषः प्रकीर्तितः । (१२)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीयः खण्डः

१. अष्टाशीतिः शतमीषा तिर्यगक्षश्चतुःशतम् ।
षडशीतिर्युगं चास्य रथश्चारक्य उच्यते ।।

२. ईषाया लक्षणं मीत्वा षट्सु नवसु च लक्षणे ।
त्रिचत्वारिंशके पाशोऽङ्गुलानां नियोगतः ।।

३. एषा वेदिः समाख्याता चारक्यरथसंमिता ।
ऐन्द्राग्नस्य पशोरेषा । पशुष्वन्येषु षट्शया ।।

४. प्राच्यर्धः षडरत्निः स्यादर्धारत्नेर्निराञ्छनम् ।
अर्धे श्रोणी ततोऽर्धेऽंसावध्यर्ध इति पाशुकी ।।

५. पाशादर्धशये श्रोणी द्वयोः पृष्ठ्यापरा द्वयोः ।
प्राच्यर्धस्तु ततोऽध्यर्धे ततोऽध्यर्धे निराञ्छनम् ।।
अर्धेऽंसोऽध्यर्ध एवान्यस्ततोऽध्यर्धेऽंस उत्तरः ।
अरत्नौ तु ततः पाशो वेदी मारुती वारुणी ।।

६. सर्वादशशया रज्जुर्मध्ये चास्या निराञ्छनम् ।
प्राच्यर्धं पञ्चमे कुर्याद् दिक्कुष्ठा पैतृकी स्मृता ।।

७. सर्वा सप्तशया रज्जुर्मध्ये चास्या निराञ्छनम् ।
प्राच्यर्धं पञ्चमे कुर्याद् दिक्कुष्ठा पैतृकी स्मृता ।। (१२ + ७ = १९)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृतीयः खण्डः

१. प्राग्वꣳशं दशकं कुर्यात् पत्नीशालां चतुःशयाम् ।
प्राग्वꣳशात् त्रिषु वेद्यन्तो वेद्यन्तात् प्रक्रमे सदः ।।

२. नवकं तु सदो विद्याच्चत्वारः सदसोऽन्तरम् ।
चत्वारस्त्रिका हविर्धानमर्धषष्ठस्तदनन्तरम् ।।

३. पदꣳ यूपावटे मीत्वा शेषमौत्तरवेदिकम् ।
आग्नीध्रꣳ षडरत्न्येव षट्त्रिꣳशत्प्रक्रमा रज्जुः ।।

४. लक्षिका द्वादश त्रिका । वेदिसदोहविर्धानानि मिनोत्येवानुपूर्वशः
पञ्चदशकमेकविꣳशकं त्रिकमपरं । परतोऽपरस्त्रिस्को द्वादशसु च
पाशद उच्यते । सोमे रज्जुनिमानमुत्तमम् ।।

५. त्रिपदा पार्श्वमानी स्यात् तिर्यङ्मानी पदं भवेत् ।
तस्याक्ष्णया तु या रज्जुः कुर्याद् दशपदां तया ।।

६. पादादर्धं चतुर्दशे नवके तु ततः पुनः ।
अर्धचतुर्दशः पाशः सदसश्छेदनमुत्तमम् ।।

७. निमाय रज्जुं दशभी रथाक्षैरेका दशभिश्चोपरबुध्नमात्रैस्तस्या-
श्चतुर्विꣳशति भागधेयमेका दशिनीं प्रति वेदिमाहुः ।

८. शिखण्डिनी चेत्कर्तव्या वेद्यन्ताद् द्व्यर्धमुद्धरेत् ।
अष्टाङ्गुलं तदर्धꣳ स्याद् देव्य वेदि प्रसिद्धये ।
तं प्राञ्चं तु समीक्षेत ताꣳस्तु विद्याच्छिखण्डिनीम् ।।

९. पञ्चकꣳ सप्तकं चैव एकमेकं ततः पुनः ।
एषा वेदिः समाख्याता कौकिल्यास्त्वथ चारके ।। (१९+९= २८)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थः खण्डः

१. जन्मना रोगहीनो वा यजमानो भवेद्यदि ।
कथं तत्र प्रमाणानि प्रयोक्तव्यानि कर्तृभिः ॥

२. तुण्डं पुष्करनालस्य षड्गुणं परिवेष्टितम् ।
त्रिहायण्या वत्सतर्या वालेन सममिष्यते ॥

३. त्रयस्त्रिहायणीवालाः सर्षपार्धं विधीयते ।
द्विगुणं सर्षपं प्राहुर्यवः सर्षपार्... ॥

४. अङ्गुलस्य प्रमाणं तु षड्यवाः पार्श्वसंहिताः ।
दशाङ्गुलस्तु प्रादेशो वितस्तिर्द्वादशाङ्गुलः ।
द्विवितस्तिररत्निः स्याद्व्यायामस्तु चतुःशयः ॥

५. विंशतिशताङ्गुलतः पुरुषः स्वैः स्वैरङ्गुलिपर्वभिः ।
अथ चेत्प्रपदोत्थानः पञ्चविंशशतो भवेत् ॥

६. त्रियवं कृष्णलं विद्यात्तं मानं विद्यात्त्रिकृष्णलम् ।
अनेन कृष्णलप्रमाणेन निष्कमाहुश्चतुर्गुणम् ॥

७. पुरुषस्य तृतीयपञ्चमौ भागौ तत्करणं पुनश्चितेः ।
तस्यार्धमथापरं भवेत् त्रिचितिकमग्निचितिश्चेत् ॥

८. अष्टावष्टौ संमिता चितिरष्टैकादशिका च मध्यमा ।
व्यत्यासवतीरुपन्यसेदष्टौ द्वादश चोत्तमा चितिः ॥
अष्टौ द्वादश चोत्तमा चितिरिति ॥ (२८ + ८ + ३६)

॥ इति शुल्बसूत्रं समाप्तम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीयः पटलः

प्रथमः खण्डः

१. अथात उत्तरेष्टकᳩ व्याख्यास्यामः ।

२. ऊर्ध्वबाहुना यजमानेन वेणुᳩ विमिमीते ।

३. तत्समोऽन्यतरः सारत्निर्द्वितीयः, तस्य पुरुषे लक्षणमरत्नि वितस्त्योश्च, उभयोरर्धपुरुषे ।

४. शिरसि परिश्रिते यूपायावशिष्य शेषमनुरज्जु पुरुषौ संधाय पञ्चाङ्ग्या शङ्कुᳩ विनिहन्ति तयोः संधावर्धयोश्च ।

५. यावभितो मध्यमᳩ शङ्कुं तयोर्वेणू निधाय दक्षिणतः पुरुषसंनिपाते तोदं करोति ।

६. मध्यमे शङ्कौ वेणुं निधायाध्यधि तोदᳩ हृत्वा दक्षिणतः पुरुषे शङ्कुं निहन्ति ।

७. पूर्वे शङ्कौ वेणुं निधाय द्वितीयं दक्षिणतः पुरस्तात्पुरुषसंनिपाते शङ्कुं निहन्त्यर्धे च, एवं पश्चात् ।

८. एतेनोत्तरार्धो व्याख्यातः ।

९. दक्षिणस्य वर्गस्य यावभितो मध्यमᳩ शङ्कुᳩ तयोर्वेणू निधाय दक्षिणतः पुरुषसंनिपाते तोदं करोति ।

१० मध्यमे शङ्कौ वेणुं निधायाध्यधि तोदᳩ हृत्वा दक्षिणतः सारत्नौ शङ्कुं निहन्ति ।

११. यः सारत्निस्तं मध्यमस्य पूर्वे निधाय द्वितीयं दक्षिणतः पुरस्तात्सारत्निमर्ध पुरुषेण संनिपात्य शङ्कुं निहन्ति, एवं पश्चात् ।

१२. एतेनैवोत्तरपक्षो व्याख्यातः ।

१३. पुछᳩ । सवितस्तिररत्निस्थाने ।

१४. पूर्वस्य पुरस्तादर्ध पुरुषेण पञ्चाङ्ग्या शिरो विमिमीते ।

(३६ + १४ = ५०)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीयः खण्डः

१. व्यायामस्याष्टममेकतस्तुरीयमेकत उभयतस्तुरीयं च ते गार्हपत्यचितेः करणे ।

२. पुरुषस्य दशमेन भागेन प्रथमं चतुरस्रं करणं कारयेत्, दशममेकतोऽर्धमेकतस्तद् द्वितीयं दशममेकतोऽध्यर्धमेकतस्तत्तृतीयमुभयतस्तुरीयं तच्चतुर्थम् ।

३. तासामुत्सेधस्त्रिंशत्पञ्चम भागेनान्यत्र नाकसद्भ्यश्च चूडाभ्य ऋतव्याभ्योऽथ मध्यमायां पञ्चम षष्ठीभ्यश्च वैश्वदेवीभ्यः, ता अर्धोत्सेधाः ।

४. पुरीषमन्तर्धायोत्तरामुपदध्याद्गणसंसर्गायाविछेदाय ।

५. गर्तेषूपदध्याद्यदन्यदिष्टकाभ्यः ।

६. तत्र श्लोको भवति—

उखायाः पशुशीर्षाणां कूर्मस्योलूखलस्य च ।
स्रुचोः कुम्भेष्टकानां च चरोश्चैवावटान्खनेत् ।

७. प्रतिदिशमुपदध्यात्, आत्मनि मध्ये प्राचीः, शिरसि पुछे पक्षयोश्चात्मन्यप्ययेशु समंविभज्योत्तरामुत्तरामप्ययसंहितां पूर्वापरदक्षिणोत्तरा विषयवचनात्, अन्यच्चतस्रः पुरस्तात्पञ्चर्तव्याभ्यः पश्चाच्चोत्तर पूर्वे चार्धे गार्हपत्यस्य । शेषं चतुरस्राभिः ।

८. एता एव दक्षिणोत्तरा द्वितीयस्यां । शेषं चतुरस्राभिः ।

९. यथा प्रथमैवं तृतीया पञ्चमी च यथा द्वितीयैवं चतुर्थी । एतेन धर्मेण व्यात्यासं चिनुयात् ।

१०. अथेतरानाग्नीध्रीयादीन्नवनव पदानि करोत्येकैकं मध्ये, अश्मानमाग्नीध्रीये, चत्वारिचत्वारि तुरीयाणि प्रतिदिशंहोत्रीये, चतस्रोऽर्धाः कुष्ठासु ब्राह्मणछंस्य, इतरेषां द्वे द्वे अध्यर्धे मध्ये प्राचीः, षडेव मार्जालीये पशुश्रपणे च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

११. विंशतिमध्यर्धाः प्राचीरंसयोर्दद्याच्छ्रोण्योः पुछे च विंशतिं द्वादशद्वादश पुरस्तात्पक्षयोः प्राचीः पश्चाच्च पञ्चपञ्च चोदीचीरभितः शिरसि । शेषं चतुरस्राभिः ।

१२. विंशतिं श्रोण्यंसपक्षेषूदीचीर्दक्षिणतस्तथोत्तरतो द्वितीयस्यामेकादशैका दशाभितः पुछे पञ्च-पञ्च प्राचीरभितः शिरसि । शेषं चतुरस्राभिः ।

१३. यथा प्रथमैवं तृतीया पञ्चमी च यथा द्वितीयैवं चतुर्थी, एतेन धर्मेण व्यत्यासं चिनुयात् ।

१४. त्रिरुपसत्सु द्वे पूर्वस्यां तिस्रो मध्यमायां षट्सु यथानुपूर्वेण, द्वादशसु व्यत्यासं चितिपुरीषे करोति ।

१५. एतेन धर्मेण संवत्सरात्समं विभज्य जानुदघ्नेऽस्य द्विगुणं त्रिगुणमुत्तरेषां चैकामुत्तरामुद्धत्याभ्यायनं वर्धयातिरिक्ता उपदध्यात् ।

१६. मन्त्राद्यभिमर्शनान्तं तत्पुरुषस्य लक्षणम् । (५० + १६ = ६६)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृतीयः खण्डः

१. दर्भस्तम्बं पुष्करपर्णꣳरुक्मपुरुषौ हिरण्येष्टकाꣳ शर्कराꣳ स्वयमातृण्णां दूर्वेष्टका नैवारमिति मध्यम्

[आ पञ्चमाश्रꣳ स्वयमातृण्णायां अभितस्तां मध्यम्]।

तस्मिन्कुम्भेष्टका या मध्ये दक्षिणोत्तरे च स्रुचौ, अनूपमध्येषु शेषाः, पश्चात् स्वयमातृण्णायाः कुलायिनीं द्वियजुश्च वꣳशयोः पार्श्वसꣳहिते द्वियजुरुत्तरे पुरस्ताद्रेतः सिचौ द्वे, दक्षिणे तस्मिन्वꣳशे द्वितीयामृतव्यां च पुरस्ताच्चतुर्थे लोके रेतः सिचꣳविश्वज्योतिषं मण्डलामृतव्यां घर्मेष्टकामषाढां कूर्मꣳ वृषभमिति प्राञ्चम्, उत्तरे वꣳशे दक्षिणतः पुरस्तात्स्वयमातृण्णायाः प्राञ्चमुलूखलमुसलमुत्तरपूर्व्ये चोखां मध्ये शिरसाꣳ शिरोभिः सꣳहितामुपदधाति ।।

२. तस्याः पश्चात्पुरुषशिरसः पुरुषचितिमुपदधाति ।

षट्त्रिꣳशतं प्रतीचीस्त्रिवर्गेण श्रोण्याम् ।।

३. तत्र श्लोको भवति—

तिस्रो ग्रीवाः षडꣳसयोर्द्वे बाह्वोर्नवात्मनि ।

जङ्घयोरु पञ्च पश्चादेकैकं पाणिपादयोः ।।

इति ।

४. अष्टावथापस्याः समꣳविभज्य वꣳशेषु नवमे नवमे प्राणभृतः पुरस्तादुत्तरे वꣳशे प्रथमं पश्चाद् दक्षिणे दक्षिणतः पूर्व उत्तरतः पश्चाद् दक्षिणतः स्वयमातृण्णाया द्वितीये पञ्चमम्, अनूपेषु सꣳयतो नवमेऽतिमात्रा यथा प्राणभृतः पुरस्ताद् दक्षिणे वꣳशे प्रथमं पश्चादुत्तरे दक्षिणतः पश्चादुत्तरतः पूर्व उत्तरत स्वयमातृण्णाया द्वितीये पञ्चमꣳ। वैश्वदेव्यश्चानूपेषु प्रतिदिशमुत्तरपूर्वेषु वꣳशेष्वाद्या। दक्षिणोत्तरे च सꣳयान्यौ, अप्यये तयोर्वꣳशयोराद्यात्पुरस्ताद् वाथर्वशिरः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५. समं॑विभज्य वं॑शेषु शिरः पक्षपुछानि प्रथमेषु वं॑शेषु लोकान्विजानीयात् ।

६. शिरसि प्रथमे वं॑श उत्तरामुत्तरामितरेषां पक्षपुछानां चतुर्थे पक्षयोः प्राचीः पुछे चोदीचीर्लोकेष्टका उपदध्याच्छेषाः पश्चात्स्वयमातृण्णाया एकैकां पूर्वां॑ सं॑हिताम् दक्षिणे वं॑शे वैश्वदेव्याद्य उत्तरे च पुरीषाद्यः ।

७. गायत्रं मध्ये शिरसि रथंतरं बृहद्यज्ञायज्ञियमिति यथाम्नातम् ।

(६६+७=७३)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थः खण्डः

१. द्वितीयायां पुरस्तात्स्वयमातृण्णायाः प्रथमद्वितीयतृतीयेष्वृतव्या वायव्या अपस्या इति यथासंख्यम् । तिस्रस्तिस्रो दक्षिणेषु वꣳशेषु दक्षिणोत्तरा द्वे द्वे उत्तरस्योत्तरयोर्नवमेऽभितः शेषाः यथापस्याः ।

२. तृतीयायां दश द्वादश नवमेऽभितत: । अष्टमे सप्त पुरस्तात्पश्चाच्च समीचीः । अभितः स्वयमातृण्णाया अर्धोत्सेधा अष्टौ नानामंत्रा उत्तमायाꣳ वा ।

३. चतुर्थ्यामेकैकां नवमेनवमेऽभितः पुरस्तादुत्तरस्य वꣳशस्य मध्ये प्रथमाꣳ व्यत्यासमितरा । एवमेव स्पृतः पुरस्ताद् दक्षिणस्य वꣳशस्य मध्ये प्रथमाꣳव्यत्यासमितराः । षट् सप्ताष्टमेषु दक्षिणतो युग्मायुग्मा उत्तरतस्त्रिवर्गान्कुर्यात्सप्तदश दक्षिणतः पञ्चदशोत्तरतः ।

४. पञ्चम्यामेकैकां प्राणभृदाधिषु शेषं छन्दसाꣳ विराजश्च यथातिमात्राः षट्सप्ताष्टमेष्वभितो यथासंख्यम् ।

५. अर्धेष्टकाभिः पूरयित्वा दक्षिणतः प्राचीः स्तोमभागाः पश्चिमाश्च युग्मा उत्तरतस्त्रिवर्गान् कुर्यादेकत्रिꣳशतम् । पश्चात्प्रत्यञ्चं त्रिवर्गेण नाकसदं च पश्चात्पुरीषवत्या यवादिना सनाम्नीरूपशीवरीर्घृतप्लुता इति यथासंख्यम् । तुरीयाणि मध्ये यथा प्राणभृतोऽतिमात्रा मध्यमाꣳ स्वयमातृण्णा सꣳहितामुत्तरतस्तु विकर्णीम् ।

६. इति सुपर्णस्य । (७३+६=७९)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चमः खण्डः

१. यावती शोष पाकाभ्यामिष्टका ह्रसते कृता ।
तावत् समधिकं कार्यं करणꣳ सममिच्छता ।।

२. सदा च त्रिꣳशकं भागमिष्टका ह्रसते कृता ।
तावत्समधिकं कार्यं करणꣳ सममिच्छता ।।

३. एकैकꣳ शतमध्यर्धं तद्गतꣳ षड्भिरङ्गुलैः ।
इष्टकानां परिमाणꣳ वैकृतꣳ यदतोऽन्यथा ।।

४. नवाङ्गुल सहस्राणि द्वे शते षोडशोतरे ।
अङ्गुलानां परिमाणꣳ व्यायामस्य तु निर्दिशेत् ।।

५. इतरेषां तु धिष्ण्यानाꣳ सर्वेषामेव निश्चयः ।
एकैकस्य सहस्रꣳ स्याच्छते षण्णवतिः परा ।।

६. एकादश सहस्राणि अङ्गुलानाꣳ शतानि षट् ।
शतं चैव सहस्राणां क्षेत्रमग्नेर्विधीयते ।

७. प्राकृतꣳवैकृतꣳ वापि क्षेत्रमर्धाष्टमान्तरे ।
पञ्च विꣳशꣳशिरः कृत्वा ततः क्षेत्रे समावपेत् ।।

८. शतान्यष्टौ पदोनानि पदानामिह कीर्त्यन्ते ।
साङ्गस्य सशिरस्कस्य क्षेत्रं क्षेत्रविदो विदुः ।।

९. आत्मा चतुः शतः कार्यः पक्षौ त्रिꣳशच्छतौ स्मृतौ ।
दश पुछे शतं चैव शिरः स्यातपञ्चविꣳशकम् ।।

१०. एकत्रिꣳशस्त्रयस्त्रिꣳशैर्वर्गैः पञ्चाशकैरपि ।
असंभवत्सु वर्गेषु द्विधा भिद्येत इष्टका ।।

११. इष्टिकाह्रासवृद्धिभ्यां दृढासु शतकेषु च ।
मतिमानिष्टका भागैर्मन्त्रात्संनाशयेदिति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१२. चतुरस्त्रे पृष्टौ वापि पक्षपुछशिरेष्टकाः ।
दिक्तोऽपधानश्चलोकाच्च तथा लोकस्तु लुप्यते ।।

१३. अध्यात्मनि ह विज्ञेयमुपधानश्च विजानता ।
रथंतरबृहल्लोकैरन्यं गायत्रयाज्ञियैः ।।

१४. यजुष्मतीनाश्च संख्या तु सर्वासां चैव निश्चिता ।
एकैककस्यां चितौ वापि तां मे निगदतः श्रृणु ।।

१५. षडशीतिः शतं त्वाद्या द्वितीया दशसप्ततिः ।
त्रयोदश तृतीया स्याच्छतं चाहुर्मनीषिणः ।।
चतुर्थी शतमेका स्यात्तिस्रश्चैवेष्टकाः स्मृताः ।
शतानि त्रीणि पञ्चाशत्षट् चैव चितिरुत्तमा ।।

१६. एताः सर्वा यजुष्मत्यो याभिरग्निः प्रसूयते ।
शेषश्च लोकंपृणाभिस्तु चितीनामभिपूरयेत् ।।

१७. एताः सर्वा समाम्नाताः यजुर्यावत्प्रवर्तते ।
तदेतद्धि सहस्रश्च स्याच्छर्कराभिः सहोच्यते ।।

१८. एता उपहिताः सम्यग्घेनवस्तु प्रजायन्ते ।
अमुष्मिन्यजमानाय कामान्दुह्यति सर्वशः ।।

१९. पष्टिं प्रजापतिश्च वेद यो हि सश्चवत्सरः स्मृतः ।
गछति ब्रह्मणो लोकं नाकं ब्रध्नस्य विष्टपम् ।।

इति ।। (७९ + १९ = ९८)

।। इत्युत्तरेष्टकश्च समाप्तम् ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृतीयः पटलः

प्रथमः खण्डः

१. वैष्णवे या प्रमेयाय शुल्ब विद्भिश्च सर्वशः ।
संख्यातृभ्यः प्रवक्तृभ्यो नमो भरन्तो ये मसे ॥
इदं भूभ्या भजामहे या नो मानकृतामिव ।
यज्ञियं मानमुत्तमꣳ वर्धमानꣳ स्वे दमे ॥

२. स्पष्टा भूमिर्ऋजुः शङ्कुर्मौञ्जꣳशुल्बमबन्धुरम् ।
चित्रादौ नाकृतिः कार्या तिथ्यृक्षꣳ वरुणशुभम् ॥

३. सर्वाः प्रागायता वेद्यः करणꣳयस्कदेहिकम् ।
अर्धेनार्वसमꣳसर्वमुछेदो जातु पञ्चकम् ॥

४. मध्यमेऽर्धमृतव्यानां नाकसत्पञ्चचूडयोः ।
करणाद्यर्थमुद्दिश्य क्षेत्रमर्धाष्टमान्नरः ॥

५. अनःसिद्धꣳहविर्धानं पात्रसिद्धाः खराः खराः ।
चात्वालः पशुभिः सिद्धो हर्विभिः साग्निकाः खराः ॥

६. मण्डलार्धं चतुःस्रक्तिरत्निनाꣳ विहिताः खराः ।
अरत्निर्धन एतेषां भूयस्त्वे भूयसीविधौ ॥

७. पुर्वश्चतुर्विꣳशतिभागे लेख्यश्चतुर्वꣳशैरालिखितस्तु पश्चिमः स्याद् दक्षिणेऽष्टद्विगुणेन लेख्यस्त्रिꣳशद्भिरायम्य हरेतु रायम् ।

८. उदक्प्रक्रम्य चात्वालꣳशामित्रं प्रक्रमे ततः ।
भूयस्तत्पशु भूयस्त्वे वृद्धिरुत्तरतो भवेत् ॥

९. आयामबाहुं निक्षिप्य विस्तरस्तु तथा पृथक् ।
सोऽध्यर्धं गुणयेद्राशिꣳस सर्वगुणितो घनः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१०. आयाममायामगुणꣳविस्तारꣳ विस्तरेण तु ।
समस्य वर्गमूलꣳयत्तस्कर्णं तद्विदो विदुः ॥

११. श्रवणाभिजितोर्बहुलातिष्ययोर्वा चित्रास्वात्योरन्तरेऽप्स्वग्निना वा ।

१२. नक्तं प्राचीभास्करश्रायमाहुः ।
शङ्कु लिप्ते मण्डले प्राक्-पराक् चेति ॥ (९८ + १२ = ११०)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीयः खण्डः

१. जन्मना रोगहीनो वा यजमानो भवेद् यदि ।
कथं तत्र प्रमाणानि प्रयोक्तव्यानि कर्तृभिः ।।

२. यद्युरुतन्तुः केशो वास्तृतः सर्षपो यवश्चैव षड्गुणितः षड्गुणितो भवति नरस्याङ्गुलं माने तद् द्वादशकं प्रादेशमित्याहुः ।

३. तद्द्वयंश्च स्मृतोऽरत्निः प्रक्रमोऽरत्निसमः स द्विः प्रादेशो भवेच्चितिषु ।

४. अध्यर्धाङ्गुलहीनाश्चत्वारः प्रक्रमा भवेन्नियताः ।

५. तत्रैकादश यूपाश्चत्वारश्चतुरुत्तराः सत्त्रेसत्त्रे ।

६. एकस्यांश्च वेद्यामग्निद्वयमिष्टकारिक्तं भवति । पृथगतो वेदिः चेत्पृथगग्निः क्लृप्तः ।

७. विंश्शत्यङ्गुलः शतं नियतः पञ्चारत्निर्नरो दशपदो वा ।
हीनातिरिक्तयुक्त्या देहेदेहे प्रमाणं तु ।।

८. षडशीतिर्युगमुक्तंश्च साष्टादश उच्यते त्वक्षः, तन्त्रसमसमस्तं द्व्यजंश्च रथमीषांश्च व्यवास्यन्ति ।

९. मण्डलमथ चतुरस्रं मण्डलं च यः कुर्यात्तस्येमं करणविधिं तद्विदां, उदाहृतंश्च शृणुत ।

१०. मण्डलविष्कम्भसमस्त्रिभुजादवलम्बकश्चतुः स्रक्तिः प्रागायतात्त्रिभागात्कर्णात्स मण्डलं भवति ।

११. पुरुषः पुरुषं कुर्यात्तस्याक्ष्णया द्विपुरुषं भवेच्चतुरस्तस्याप्यक्ष्णया द्वाभ्यांश्च वा स्याश्चतुःपुरुषम् ।

१२. द्विपुरुषः करणी श्रोणी बाहुस्तु द्विगुणो भवेत्, त्रिकुष्ठवत्त्र्यवलम्बकस्ततो यश्चतुरस्रे द्वाष्टमाः पुरुषाः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१३. विष्कम्भः पञ्चभागश्च विष्कम्भस्त्रिगुणश्च यः ।
स मण्डलपरिक्षेपो न वालमतिरिच्यते ।।

१४. दशधा छित्त्वा विष्कम्भं त्रिभागानुद्धरेत्ततः ।
तेन यच्चतुरस्रं स्यान्मण्डले तदपप्रथिः ।।

१५. चतुरस्रं नवधा कुर्याद्धनुःकोट्यस्त्रिधात्रिधा ।
उत्सेधात्पञ्चमंशं लुम्पेत्पुरीषेणेह तावत्समम् ।।

१६. चतुररत्निर्वा नरः सिकताकरणे त्वर्धं भुजः प्रदिश्यते ।

१७. करणानि ततोऽस्याः कारयेत् त्रिचतुः पञ्च त्रिरभिपर्यस्य यच्छुभं चयनेषु विधिः पुरातनैर्ऋषिभिर्यो ऽभिहितश्च नित्यशः ।

१८. परिलेखनमानसंचयैर्व्यत्यासैः परिमाणसंपदा वेद्यः सर्वाः प्रमाणैरायामेन च विस्तरेण च मिमीयात् ।

१९. चतुरस्रंसंपदा द्वायायामसमापनाः स्मृता पञ्चाङ्ग्याथ वा पुरातनैर्याः पूर्वैर्ऋषिभिः प्रदर्शिताः ।

२०. यश्चैष विधिर्मर्याक्तितस्तत्रैषा मिथुनात्समम् । पञ्जाङ्गी तावती रज्जुर्यया सर्वं मिमीमहे । ऋते कङ्कालजश्येनांस्तेषां वक्ष्यामि लक्षणम् ।

२१. इयं मिता या समयार्धलक्षणा ततश्चतुर्थे भवेन्निराञ्छनं ततोऽर्धशिष्टा विस्तारसमा चयस्य । यत्ततश्चतुः कुष्ठमिहानया चरेत् ।

२२. प्राची मथायामसमां निदध्यात्पाशौ निखन्यादथ मध्यमं च ।

२३. उन्मुच्य पश्चादथ मध्यमे तत्प्राग्दक्षिणायस्य निराञ्छनेन विस्तारतो ऽर्धे निखनेत शङ्कुं । प्रत्यक्तथोत्तरमध्यमे च । स वासुवेदीषु ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२४. अथ मानमेतच्छ्रोण्यां तु पाशोद्धरणं क्रियेत ।

२५. अंसश्रोण्योर्लिखेत दिक्षु लेखाः, शङ्कू निहन्यात्समरेषु तेषु । तेभ्यः समन्तात्परिलेखयेत ।

२६. यद्येष्टिका नोभौ लिखेत शिष्टौ ।

२७. पूर्वे त्रिभागे त्वपरे च सिद्धोपस्थितावुत्करदक्षिणाग्नी ।

२८. अथान्यदस्य परिलेखनं तु मध्ये भवेद्दिक्षु नवाङ्गुलेनेति ।

(११० + २८ = १३८)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृतीयः खण्डः

१. प्रमाणार्धं तु षष्टच्यूनथं विशेष इति संज्ञितम् ।
विशेषश्च प्रमाणं च प्रमाणस्याज्ञया भवेत् ।।

२. प्रमाणार्धमन्यत्स्यात्, पाशषष्ठे सचतुर्विंशे लक्षणं करोति तन्नि-
राञ्छनमक्षणया तिर्यङ्मानी शेषः । पाशादर्धशये श्रोणी द्व…

३. ………………………………चाग्नीध्रमिहोपदिश्यते ।।

४. अग्नेर्यदक्षणयामानं तस्य चैव तदक्षणया ।
तदाश्वमेधिकथं विद्यादेकविंशद्विधौऽथ वा ।।

५. पुरुषस्तिर्यग्भवेद्यदनुदशधा यो मितः ।
तस्य कर्णेन यत्क्षेत्रं विद्यादेकादशं तु तत् ।।

६. उभौ बाहू नशक्ष्णां तु नरस्तिर्यक्तदक्षणया ।
एकोच्चतानैकशताद्बाहुवृद्ध्या विवर्धयेत् ।।

इति ।। (१३८+६=१४४)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थः खण्डः

१. अवलम्बककुष्ठे तु यो भवेत्षोडशाङ्गुले ।
सौत्रामण्या भवेदेष प्रक्रमो मानकर्मणि ।।

२. प्रक्रमस्य तृतीयेन सौमिकी सार्पराज्ञिकी ।
संतृतीयै स्त्रिभिश्चान्यैः सिद्धमौत्तरवेदिकम् ।।

३. चतुर्दशाङ्गुलो वा स्यात्प्रक्रमस्तेन सौमिकी ।
शतैर्द्वादशभिर्वापि मिनुयात्पाशुकामिव ।।

४. सचतुर्थे वनꣳ षड्भिर्नवभिर्वाथ सप्तभिः ।
नवभिर्वापरं चक्रं करणार्धे न लेखयेत् ।।

५. चतुर्षु निवपेदेषाꣳ सावित्रादिषु यो विधिः ।
अरुणे जानुदघ्ने निखन्याददद्भिस्तु पूरयेत् ।।

६. चतुरस्रमथापि मण्डलं द्विविधं गार्हपत्यलक्षणꣳ व्यायाममितं चतुर्भुजं पुरुषार्धेन तु मण्डलं परिलिखेत् ।।

७. व्यायामतृतीयमायान्तं चतुरस्रꣳ सप्तमभागविस्तृतं प्रागाचित मुत्तराचितꣳ व्यत्यासे तदर्थैकविꣳशकम् ।

८. पुरुषस्य तृतीयमायान्तं चतुरस्रꣳ षड्भागविस्तृतं । प्रथिकश्च तदायतो भवेन्मध्ये तेन समायतो भवेन्मध्ये तेन समास्तिके··· शेषौ कोणौ प्रथिकमितौ समौ तद्विस्तारकृतौ विशाखः ।

९. षड्भागकृतायामो भवेद्द्व्यर्धे तु त्रिकोणसꣳस्थिते ।

१०. चतुरस्रविपाणकः प्रथिको ऽर्धं प्रथिकश्च यो मितः ।

११. करणानि भवन्ति मण्डले चत्वारि प्रमितानि भागशः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१२. मध्ये ऽस्य चतस्र इष्टकाः तत्पूर्वापरयोर्द्वयोर्द्वयं ।
प्रतिको ऽर्धविषाणिकद्वयं पुनरेव पुनरैति मण्डलं,
अर्धप्रथिकद्वये समथ्ंश संपूर्णं, तदथैकविंथ्ंशकम् ।

१३. व्यत्यासमुदङ्मुखेन सह व्यत्यस्येद्वेत्युत्तरोत्तरम् ।

१४. अध्यर्धं पद्यं च पद्यार्धपद्यपादवत्पद्यार्धोत्सेधमित्याहुर्गायत्रे करणानि च ।

१५. चतुर्गुणां द्विपुरुषाथ्ंश रज्जुं कृत्वा समाहिताम् ।
समभागज्ञातृतोदान्तां पञ्चाङ्गीं तद्विदो विदुः ।।

१६. मध्यमात्पाशयोस्तोदो गायत्रमानमुच्यते ।
सारत्नावर्धपुरुषे । चतुरस्रस्तया मितः ।
पक्षपुछान्तयोर्वृद्ध्या गायत्रेणेतरेषुभिः ।।

१७. इष्टका शोषपाकाभ्यां त्रिंथ्ंशन्माना हीयतेत्तु ।।

१८. ततः क्षेत्रं त्रिचतुर्भागं निरुह्यादापयेच्छिवम् ।

१९. अथ्ंस उत्तरेथ्ंऽसे च प्राच्यो ऽध्यर्धास्तु विंथ्ंशतिर्दश पुछे द्विर्द्वादशकौ पक्षयोरभितः पुछे तु पञ्च देयाः पञ्च प्राचीः पञ्चदश दद्याच्छिरसि । चतुरशीती पक्षयोः पञ्चाशतं त्रिंथ्ंशतमात्मनि पद्या भवन्ति शतमेकोनं पुछे ऽथ्ंसश्रोण्योर्विंथ्ंशतिर्विंथ्ंशतिः पुछे पक्षयोर्दशदशाहुः ।

२०. अध्यर्धा दश शिरसि प्राच्युदीच्यो भवन्ति ।

२१. पूर्वोपहिता प्रथमा पदयुजः सर्वा । द्वितीयावाग्युजो ऽश्विनी ।

२२. व्यत्यासं चिनुयादेवं जानुनास्य वर्त्मसु ।

२३. त्रिपदा अल्पक्षेत्रा एकचितिकाश्चतुः करणयुक्ताः
धिष्ण्या भवन्ति साग्निचित्यमन्त्राः सातिरिक्ताश्च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२४. अध्यर्धास्तु चतस्रो द्वे मध्ये नकुलश्चतुर्भागः ।

२५. अश्मा नवमो ऽग्नीध्रे ।

२६. होत्रीयमतः सद्‌ध्ंवक्ष्यामो । ऽद्‌ध्ंसश्रोण्योः पद्याश्रया नकुलका बहिस्तिसृषु दिक्षु, अन्तश्चतुर्दश पदकचतुर्थाः स···यः प्रतिदिशमष्टौ पद्या दिक्षु विदिक्षु ।

२७. ब्राह्मणाच्छध्ंस्ये दश चैका स्युर्मध्ये द्वौद्वौ चतुर्थ्यौ नकुलकश्च ।

२८. अभितस्तिस्रः पद्या द्वे मध्ये ऽध्यर्धे शिष्टेष्वष्टौ ।

२९. अध्यर्धाः षण्मार्जालीये । ऽसं मार्जालीयध्ं स्याद् दक्षिणपार्श्वेन शामित्रं चात्वालस्य च पश्चात्, अवभृथकल्पेऽप्येवं पदमेकतस्त्रिपदस्तिस्रो ऽतिरिक्तेष्विति ।। (१४४ + २९ = १७३)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चमः खण्डः

१. सप्तत्रिंशत्सार्धाः पक्षः सव्यश्च शिरसि चत्वारः षड्विंश-कस्तथात्मा श्येने पञ्चदशकं पुछं। सप्तदशकं पुछं द्वयंशिर-स्यात्मपक्षयोः क्लृप्तमलजस्य। भागसंधान्तयज्ञैः प्रतिमा नरचतुर्थे।

२. अष्टौ भागाः पुछं कङ्कचिते भवति पादयोश्चतुरः शिरसि तु सप्तज्ञेयाः श्येनवदात्मा च पक्षौ च।

३. श्येनालजकङ्कानामष्टौ सार्धा विस्तृतं पुछं चत्वारो त्मा द्वौ च शिरः सर्वेषां पञ्चकौ पक्षौ।

४. श्येनालजकङ्कानां द्वित्रिचतुः कुष्ठमित्युच्यते पुछं। पञ्चाक्षणाः पक्षपात्रास्त्वक्षणाभिः परिश्रिताः।

५. पुछे द्वौ भागावानयेत्पुछमलजेन त्रिकुष्ठवत्, त्रीन्श्येन पुछाच्छि-र्रासि कङ्के पादौ तु हरेत्।

६. प्राचीर्द्वादश सार्धा विंशतिरुदीचीर्भवेन्मिता भागा, दश पञ्च कङ्कचितौ, अलज उदीचीस्त्रयोदश सार्धाश्च।

७. त्रिचतुर्भागमानी स्याद् रज्जुरर्धत्रयोदशी।
मध्ये च लक्षणं तस्याश्चतुर्भागैर्निराञ्छनम्॥

८. भागिकाश्चत्वारस्तोदा अर्धषष्ठे ऽपरः स्मृतः।
अर्धाश्च मे ऽष्टमे चैव नवमे दशमे ऽपरः।
अर्धद्वादशो वान्यः।

९. ततः प्राचीः प्रसार्य तु तस्या निखानयेच्छङ्कुम्।
पाशयोर्मध्यमे ऽष्टमे। चतुर्थे वाहृत्य पाशम्।
आसंज्य मध्यमे निराञ्छनम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१०. निरायम्य विनुद्योन्मुच्य मध्यमात् ।
अभितो दशम आयम्य भागा द्विकचतुष्का: ।
अर्धषष्ठेऽपि चाहत्य पूर्वदिवꣳ समाचरेत् ।
तुल्यꣳ शङ्कुं तुर्ये ।

११. ततः प्राचीः प्रसार्य तु अर्धषष्ठकयोः पाशौ ।
शङ्कू अर्धाष्टमेऽष्टमे । प्रगृह्य पश्चिमशङ्कू ।
द्विकयोर्वोत्सृजेत्ततः ।

१२. चतुर्थनवमौ शङ्कू प्रवृहेदन्ति मावुभौ ।

१३. अष्टमे पाशमासज्य अष्टमेनैव निग्रहः ।
भागेभागे ततः शङ्कू तयोः ।

१४. अष्टमे पाशमासज्य आदिशङ्कौ निगृह्य च ।
दशमे शङ्कुमाहन्यात्पुछार्धे अलजस्य तु ।

१५. ···स्यार्धाष्टमे शङ्कुः कङ्कस्य दर्शनेस्मृतः ।

१६. त्रिके पाशꣳ समासज्य दशकेन निगृह्य च ।
एताभ्यामेव तोदाभ्याꣳ शङ्कू देयौ तथोत्तरौ ॥

१७. अर्धद्वादशमे पाशस्त्रिको निग्रहणो भवेत् ।
आदिपाशे द्विके चैव शङ्कू देयौ तथोत्तरौ ॥

१८. उत्तरे द्विकमासज्य दक्षिणꣳ समयोर्हरेत् ।

१९. चतुर्थे शङ्कुमाहन्याद् विपरीतꣳ समाचरेत् ।
चतुर्थे तु तदर्थेन निगृध्य च···

२०. **इति श्येनस्य रज्जुर्द्वादशलक्षणा ।**

२१. चत्वारि करणान्येषां त्रिचतुर्थेन कारयेत् ।
नवभागा अक्ष्णार्धाक्ष्णा. पञ्चकोणाः च भागशः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२२. प्राचीने पञ्चकोणे द्वे अथार्धाक्ष्णाद्वयं न्यसेत् ।
अथंसाग्रयोरथैकैका एवं पक्षविपक्षयोः ।

२३. नवभागैश्चितं मध्यमक्ष्णाभिः परिषिञ्चते ।
पक्षाग्रे पञ्च पत्राण्येवं चाक्ष्णा विधीयते ॥

२४. व्यत्यासाक्ष्णाद्वयं तुन्दे पञ्चकोणे प्रत्यक्स्थिते ।
अर्वाक्षणे कण्ठसंध्योश्च पूरयेदमितंं शिरः ॥

२५. द्वे पक्षसंध्योरर्धाक्षणे पुच्छसंध्योस्तथापरे ।
दश पञ्च च पुच्छाग्रे पक्षाग्र एकविंशतिम् ।

२६. औपमाने चयने चैषांं व्यत्यासे करणेषु च ।
रज्ज्वाश्चावपनंं ह्रासो श्येनसिद्धिरिति स्थितिः ।

२७. अवक्रपक्षमलजं च पूर्वपक्षे तथायुतम् ।
मध्यात्प्रसिद्धं पुच्छं श्येने दाम्ना प्रसिध्यत इति ॥

२८. नवमात्प्राग्भागे शङ्कू तुरीयस्य करणम् ।
अलजे पक्षार्धमवक्रताद्ध्येवं भवेत् ॥ (१७६+२८=२०१)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षष्टमः खण्डः

१. पुरुषस्य तृतीयपञ्चमौ भागौ तत्करणं पुनश्चितेः ।
तस्यार्धमथापरं भवेत् त्रिचितिकमग्निचितिश्चेत् ।।

२. अष्टावष्टौ संमिता चितिरष्टैकादशिका च मध्यमा ।
व्यत्यासवतीरुपन्यसेत्, अष्टौ द्वादश चोत्तमा चितिः ।।

३. पञ्चदशनरं क्षेत्रं प्रउगचित्ततस्त्वर्धम् ।
मध्याद्दशके त्रिकुष्ठमेतत्तथा करणम् ।।

४. बाह्वोरेकविंशश उभकरणे तथार्धोऽन्यश्च ।
अंसश्रोण्योश्छेदस्तस्योभयतो भवेत् प्रउगः ।।

५. चात्वालेभ्यश्चतुर्भ्यस्तु समूह्योऽग्निरनिष्टकः ।
दिग्भ्यः पुरीषैः समूह्यो भागशो युक्तितो विधिः ।।

६. मण्डलचतुरस्रोऽद्य परिवार्यः श्मशानचित् ।
द्रोणचित्सरुमानेषां दशभागो भवेत्सरुः ।।

७. मण्डले चतुरस्रं तु कुर्याद् गार्हपत्यवत् ।
बाह्वोर्विंशति भागेन वारुणंसार्धमेव तु ।।

८. प्रसिद्धं दशधा कुर्याद बहिरन्तश्च युक्तितः ।
त्रिकुष्ठश्च विषाणः स्यात्संधौ व्यत्यास एव सः ।।

९. चतुरस्र करणं बाह्वोर्द्वात्रिंशद्भागिकम् ।
चतुरस्रमथाध्यर्धं ताभ्यां गायत्रवद्विधिः ।।

१०. साहस्रस्य करणं बाह्वोः पञ्चदशभागं चतुरस्रम् ।
अध्यर्धास्तु ततः स्युर्द्विशताश्चितयः स्मृताः ।।

११. पञ्च पञ्चाशतमध्यर्धास्तिस्रः पञ्चाशतं चतुरस्राः ।
सहस्राच्छतं पक्षाः स्युरुषा सहस्रतमी ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१२. बाह्वोरेकत्रिंशो भागः करणं चितिस्तथोत्तरयोः ॥
चतुरस्रानां साहस्रं सवनिके व्यवास्यन्ति ॥

१३. अर्धैकादशपुरुषं घनं भवेद्भवेन्मण्डलं रथचक्रम् । नाभिररा विवरधा नेमिररेभ्यो यद्यतिरिक्तम् ।

१४. तदर्धाः पुरुषायामाः पुरुषाष्टभागविस्तृताः चतुर्विंशतिस्त्रि-नरनायाः ।

१५. विवरकरणमतः संप्रवक्ष्यामि । द्विसप्तमेन नेम्यस्त्रकरणं भवेदरस्याष्टभागेन वैकृतश्चतुर्विंशतिभागेन नाभ्यामन्तरमन्तरोऽष्टमभागेन प्रउगवद् भवेत् ।

१६. द्वीष्टकाञ्चिनुयान्नाभिं चतुर्भिश्चिनुयादरान् ।
त्रिभिर्नेमिंयथाभागं । व्यत्यासः कूपवत्स्मृतः ॥

१७. विष्कम्भस्य चतुर्थेन नाभ्यास्तु विवरं लिखेत् ।
त्रिचत्वारिंशाङ्गुलां नेमिं सार्धचतुरङ्गुलाम् ॥

१८. सिद्धमन्यद्यथा युक्तिश्चयने याश्च संपदः ।

१९. य इदमपि सथातथं स्मृतिं विधिंयदाधीत्य मिमीते रौरवं समवति खलु कृत्स्नसंमतो व्रजति च शुल्बकृतां सलोकताम् ॥ (२०१+१९=२२०)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सप्तमः खण्डः

१. रथचक्रस्य चित्यस्य संक्षेपोक्तस्य विष्णुना ।
अथ धातुर्निविष्ठस्य त्रिगुणान्यं बहिर्बहि ।।

२. लौयन्ते मण्डले यस्य सप्त सार्धा नरा बुधैः ।
मुच्यन्ते विवरेष्वन्ये क्षैत्रादभ्यधिकास्त्रयः ।।

३. तस्य चक्रविधानं तु । नेमिररेभ्यो विस्तरः ।
मण्डलानां च विष्कम्भः त्रिभागः करणानि च ।।

४. नरार्धेनाभिलिखेन्नाभिस्ततः प्रस्तारगोचरा ।
अरेभ्योऽभ्यधिका नेमिस्त्रिषष्ठेनाक्षरागारम् ।।

त्रिंशतेन सविंशेन अधिकैश्चार्धपञ्चमैः ।
मिमायाङ्गुलैर्वा मध्यं कुर्याद् विंशेन परिलेखनम् ।।

५. प्रथमे प्रस्तरे रथचक्रस्य शृणुतेष्टकाः ।
चतुर्भिरधिकंवेत्थ चत्वारिंशच्छतत्रयम् ।।

६. द्वितीयेऽभ्यधिका यान्तु चतुर्विंशतिरिष्टकाः ।
पञ्चकोणास्त्रिकोणाश्च नेम्यरेभ्यः च संधिषु ।

७. इष्टकानां सहस्रेण शतैः सप्तभिरेव च ।
अष्टषष्टया च चक्रस्य चितयः पञ्च पूरिताः ।।

(२२० + ७ = २२७)

।। इति वैष्णवं समाप्तम् ।।

।। इति शुल्बसूत्रम् समाप्तम् ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

INDEX

Adhyardhā (bricks) 63
Age of Śulba literatures 67
Agnīdhrīya 25
Agnikṣetra 27
Āhavanīya fire 3, 18, 53
Akṣa 22, 23, 32
Akṣaṇya (rajju) 37
Amśa 30, 32
Angula (unit) 22, 23, 24
Aṇu 22, 23
Anūcīnam 27
Āpastamba Śulba Sūtras 2, 6, 20, 23
Āpastambīya Śulba Bhāṣya 7, 68
Aratni (unit) 22, 23, 24
Ardhyā (brick) 25
Areas, combination of 36
Areas, transformation of 44
Baudhāyana Śulba Sūtra 2, 31
Baudhāyana theorem 52-55
Bibliography of Śulba literature 15-17
Bisection 26
Brick (iṣṭaka) 63
Brick-moulds (karaṇas) 66
Cardinal points, determination of 1
Circle (parimaṇḍala) 25, 27
Citi (fire-altar) 18, 59
Commentators on Śulba Sūtras 68
Constructions 28
Cord (rajju) operations 19
Dakṣiṇa-Agni 3, 18, 53
Dhiṣṇyā 25
Diagonal 25, of rectangles (in rational numbers) 31, 32
Dutta, Bibhutibhushan 8, 24, 28, 31
Dvārakānātha Yajvan 4, 52, 68
Dvikaraṇ (or diagonal of a square or double producer) 37
Fire-altars or citis 59, of different forms 66

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Gārhapatya Agni 3, 18, 53
Iṣa (unit) 22
Jānu (unit) 22, 23
Kāmya ceremonies 18
Kapardi Svāmin 7, 68
Karaṇī (producer) 37
Karavinda Svāmin 7, 53, 68
Karka Bhāṣya (on Kātyāyana) 12
Kātiya school 2
Kātyāyana Śulba Pariśiṣṭa 15
Kātyāyana Śulba Sūtra 12, Bhāṣya 15
Laying of bricks, dakṣiṇāyata, udgāyata 64
Mahāvedi 32, 33
Mahidhara Vṛtti on Kātyāyana Sūtras 12-13, 68
Maitrāyaṇī Samhitā 10
Maitrāyaṇī Śulba Bhāṣya 11, Sūtra 9
Mānava Śrauta Sūtra 9
Mānava Śulba Bhāṣya 10
Mānava Śulba Sūtra 2, 9
Nākasada bricks 63
Nitya ceremonies 18
Nyañchana (nirañchana) 30, 70
Pāda (unit) 22, 23
Pādyā (brick) 25
Pakṣeṣṭaka (brick) 63
Pakveṣṭakā (brick) 63
Pañcacūḍa (brick) 63
Pañcadaśabhāgīya (brick) 63
Pañcamabhāgīya (brick) 64
Parallelogram 27
Parimaṇḍala (circle) 47
Pariṇāha (circumference) 48
Pārśvamānī (rajju) 37
Pentagon 43
Pi (π) 50; its value 52
Postulates 24
Prācī 20
Prādeśa (unit) 22, 23
Prāgvamśa 18, 20
Prakrama (unit) 22, 32
Prauga (isosceles triangle) 46
Pṛṣṭhyā 30, 32
Pṛtha (unit) 22
Puruṣa(unit) 22, 23, 24, 52-55
Pythagorean theorem 52-55

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Rajju (cord, cord science) 1, 18; five types of 73
Rajju samāsa 19
Rāma (of Śulba Sūtra Vṛtti) 14
Rectangle (dīrghacaturasra) 25, 27;

construction of 31
Rectangular triangles 31, 38
Root-three (√3) values 55, 69
Root-two (√2) values
Śamyā (unit) 22, 23
Śāṇḍilya 3
Saptama karaṇi 56
Sarṣapa (unit) 24
Śatapatha Brāhmaṇa 2, 27
Saumikī Vedi
Saviśeṣa 57, 58
Science of the Śulba (by B. Dutta) 5, 24
Scope of Śulba Sūtras 16
Segment, its area
Śivadāsa, commentator on Mānava, 10, 68
Soma Vedi 23
Square 26-29, construction of 29, drawing of special 30, 31, n-times a square 36, nth part of a square 39, sum of two 40, difference of two 42, equal to two triangles 43, equal to two given pentagons 43
Śrauta Sūtras 2,
Śroni 30, 32
Straight line 28, 24
Sūlapādyā (brick) 25
Śulba (same as Śulva) 1
Śulba Dīpikā (of Venkaṭeśvara Dīkṣita) 5, 68
Śulba Pariśiṣṭa (on Kātyāyana) 28
Śulba Pradīpa 7, 9
Śulba Pradīpikā 7, 68
Śulba Sūtra Vivaraṇa (of Mahidhara) 14, 68
Śulba Sūtra Vṛtti (of Rāma) 14, 68
Śulba Vyākhyā 7, 8
Sundararāja 7
Surds 55

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Taittirīya Saṃhitā 2
Tat-karaṇī (rajju) 37
Thibaut 4, 17
Tila (unit) 23
Tiryanmānī 31, 37
Trapezium , construction of 32
Triangle (prauga) 25, 26, 27
Trihāyaṇī-bāla (unit) 24
Trikaraṇī (treble producer) 37
Triśatikā (of Srīdhara) 69
Tṛtīyakaraṇī 56
Turā Kāvaṣeya 3
Units and measures 22
Ubhayataḥ prauga (rhombus)
Vārāha Śulba Sūtra 15
Vedis or fire-altars
Viharaṇa (construction, eka-rajju; dvi-rajju) 34
Vihāra-yoga 18
Viśeṣa 57, 58
Viṣkambha 48
Vitastis (unit) 24
Vyāma (unit) 22
Vyatyāsa (alternation in brick-laying) 64
Vyāyāma (Unit) 22
Yajamānamātrī (unit) 22
Yava (unit) 24
Yuga (unit) 22, 23

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.